विलस विलस भो निखिलयामिनीं कुरु निजतेजो वियति ततम्
किं त्वमसीति कियन्मम चेतसि कौतूहलमिदमुपजनितम् ॥ १ ॥

नन्दति तन्वपि तमसि तावकं तेजो लब्ध्वा पान्थततिः
विलसेरेवं न चेदियं स्यान्मार्गज्ञाने मूढमतिः ॥
परोपकारं सततमपारं कारंकारं कथमेतम् !
नैव क्लाम्यसि मङ्गलमूर्ते प्रशंसनीयं तव चरितम् ॥
विलस विलस भो निखिलयामिनीं कुरु निजतेजो नभसि ततम्
किं त्वमसीति कियन्मम चेतसि कौतूहलमिदमुपजनितम् ॥ १ ॥(20)

II. (*a*) Express in Sanskrit:—54 men, 73rd house, About 30. boys, In 64 arts, 728, 96 times, Five-fold.
(*b*) Give the superlative degree of क्षिप्र, प्रशस्य, नीचैः, प्रेयस्. (5)

III. (*a*) Give rules for determining the gender of तत्पुरुष and द्वन्द्व compounda. Quote examples to illustrate your answer
(*b*) Write a note on the passive construction of sentences involving two objects (*i. e.* the direct and the indirect and the Primitive and the Causative.) (6)

IV. (*a*) Give Pres. 3rd per. plu. of पण्, शद्, संयस्, ऋ (Pass.)
Imperf. 3rd per. plu. of द्विष्, ह्री, इ with अधि.
Imperative 2nd per. sing. of भी, चक्ष् (Act. and Pass.), पुष्.
Poten. 3rd per. sing. of शास्, शो, शी pass., क्षुभ्.
Perf. 3rd per. sing. of ध्यै, राज्, अद्.
Perf. Futu. 1st per. sing. of स्फुट्, गूह्, .
Simple Futu. 1st per. sing. of स्यन्द्, ब्रू, नह्.
Pres. 3rd per. sing. of the caus. of रम्, वृत्, जि, रुच्, दम्भ्, रध्. (20)

(*b*) Give single derivative words for:—

ऋषेरोपदूनः, ग्रामाणां समूहः, मवस्य पत्मी, महदरण्यम्, पुष्पाणि संजातानि यम्य सः, कलहं करोति, ज्ञातुमिच्छन्, अर्थादनपेता. (4)

V. Translate into Sankrit:— (25)

The रामायण was composed by Sage वाल्मीकि. The hero of the poem is राम. He is an incarnation of विष्णु. He came into this world to deliver it from a great demon named रावण, who was doing a great deal of mischief on the earth The story of Rama's banishment into दण्डका–of सीता being carried away a captive by रावण in the disguise of a mendicant–of Rama's grief at her loss and sebsequent search for her till he discovers that she is confined in रावण's palace in लङ्का—of Rama assisted by an army of monkeys—of Rama's finally succeeding in killing Ravaṇa and recovering सीता—is told in the most charming language.

Group XV.

I. Translate into English:— (35)

(*a*) एवं ते राजपुत्रास्तानि तानि सहवसतिसुखान्यनुभवन्तः प्रतिदिनं प्रभाते मुक्तशय्या निशायां प्रवृत्तायां पुनरधिशेरते स्म शयनतलं निखिलं च दिनं स्वयं सुप्रीताः परस्परं च प्रीणयन्तः परमयैव मुदा गमयन्ति स्म । न पुनरीदृशी

समवस्थाभूद्रसालस्य ; यदा हि शरदां षड्विंशतिरतीतास्य जातस्य ततः प्रभृति वैराग्यमिवोपगतोऽयं नारमत यथापूर्वं सुहृदां गोष्ठीषु, न वारोचयत विलासान्, केवलं तु विविक्तानि निषेवमाणः, आत्मगतं वा किमपि किमपि चिन्तयन्नेकाक्येव तत इतः पर्यभ्रमत् ।

(*b*) सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
संभावनागुणमवेहि तमीश्वराणाम् ॥

(*c*) परोपकारः पुण्याय पापाय परपीडनम्

(*d*) ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम्

(*e*) अथ स मुनिदारकोऽस्मदातिथ्यं चिकीर्षुस्ततो नातिदूरं पितुराश्रममस्माननयत् । तत्र चैकदेशेऽस्मानुपवेश्य तरुमेकैकं गत्वा भिक्षामयाचत । क्षणादेव च तेभ्यो वृक्षेभ्यः स्वतश्च्युतैः फलैस्तस्य भिक्षापात्रमपूर्यत । तदादाय सोऽस्मदन्तिकमागत्य तानि दिव्यास्वादानि फलानि सादरमस्मभ्यं व्यतरत् । वयमपि तानि जग्ध्वा तृप्तिमगच्छाम । अत्रान्तरे वासरः पर्यहीयत । अपतद्दिनमणिरपराम्बुनिधौ । अम्बरं च तत्पातोच्छलितैरम्भःशीकरैरिव ज्योतिर्भिरापूर्यत । चन्द्रमा अपि विरक्त इव संवीतचन्द्रिकाधौतवल्कलः प्राचीशैलशृङ्गतपोवनमाशिश्रियत् ।

II. (*a*) Name and dissolve the compounds underlined in I *a* and *e*. (7)

(*b*) Give (1) Past Pass. Part. of वह्, तृ, क्षै, and नश् with प्र;

(2) Inf. of purpose from मस्ज्, तुप्, and इष्;

(3) gerunds from लिख्, अद्, बन्ध् with नि, रच्, with वि and गम् with अव;

(4) Pres. Part. of ह्री, मन्त्र्, आस्, प्रच्छ् (*f.*) and ह्वे (Pass.);

(5) Future Parti. of वृत्, चक्ष् and हन् (Act. and Pass.)

(6) Perf. Parti. of दृश्, पा, भञ्ज्, and अश् 5 A. (5)

III. (*a*) Quote sentences illustrating the use of:—

दिव, ग्रह् (caus.), मन्थ् (Pass), परितः and अलम्. (3)

(*b*) Correct or justify the following with reasons:-

स इन्द्रस्थ सिंहासनेधितस्थौ । तौ वाल्मीकिना विद्या अध्यापिताः । द्वादशवर्षेर्व्याकरणं श्रूयते । लोभो जनयते तृषम् । दिवसे दश कृत्वा तव स्मरति । (4)

IV. (*a*) Give 2nd Per. Sing. and 3rd Per. Plu. of the imperfect of शास्, सो with व्यव, दिह् and इ. (5)

(*b*) 3rd Per. Sing. of the Present and the Perfect of सृज्, गुह्, जागृ, and स्वञ्ज् with परि. (5)

(*c*) 2nd Per. Sing. of the Imperative and the Conditional of वस्, दरिद्रा, क्लृप्, and इ with अधि 'to study'. (4)

(*d*) 1st Per. Sing. of the Potential and the Periphrastic Future of ग्रह्, इष्, वश्च् , लिह्, and स्तु (Pass.). (4)

(*e*) State exactly what forms the following are:—
प्रोष्य, सामियाः, अभाजि, व्यात्त, नुः, अमृषत, अस्ना, सिष्णासा, ग्राह्यिषीष्ट, असूषुपः, प्रारिप्सित; उपायासि, स्नवे, अनाङ्. (8)

V. Translate into Sanskrit:—

युधिष्ठिर, the eldest पाण्डव prince, was more distinguished for piety and truthfulness than for military exploits. धृतराष्ट्र installed him king at वारणावत to avoid the jealousy of his sons. At this place, an attempt was made to burn him and his brothers alive; but they escaped and removed to इन्द्रप्रस्थ. Here the Pandavas established their supremacy and performed the राजसूय sacrifice. This excited the jealousy of दुर्योधन, who arranged for धर्म's visit to a gambling match at हस्तिनापुर. Through the treacherous contrivances of दुर्योधन and शकुनि, धर्म lost everything and had to go into exile with his wife and brothers. (20)

Group XVI.

I. Translate into English:— (40)

गन्धमूल्यम्.

[प्रविश्य विपणिस्थ आपणिकोऽग्रतश्चरन्निर्धनश्च]

आपणिकः—

रे रे निर्धन दीनवदन वद मन्दपदं किं व्रजसि पथा ।
विपणिमिमां मे चञ्चललोचन मुहुर्वीक्षसे किमिति वृथा ॥ १ ॥

निर्धनः—

अयि भो विपणिन् धनिक महाशय किमिति यामि शृणु मन्दपदम् ।
दृष्टमात्रमपि लोभयते मां मिष्टं तावकमन्नमिदम् ॥ २ ॥

आपणिकः—

अस्ति धनं यदि तर्पय रसनां नो चेदपसर दूरतरम् ।
मा मम विपणेः पुरःस्थितिं भज मार्गमिमं त्यज कृतत्वरम् ॥ ३ ॥

निर्धनः—

नास्ति धनं मे खाद्यं केतुं न पुनरितोऽपसरेयमहम् ।
न प्रभुता पथि तवेह तदलं निगद्य वचनं सुदुःसहम् ॥ ४ ॥

आपणिकः—

रे रे जिघ्रसि किं प्रसरन्तं मदन्नगन्धं मधुरतरम् ।
परान्नलोलुप नापत्रपसे वदन् वचनमिदमतिचतुरम् ॥ ५ ॥

निर्धनः—

अयि पटुबुद्धे निजान्नगन्धं वहन्तमेतं गन्धवहम् ।
किं न नियच्छसि मुधा चिकीर्षसि निरागसो मे विनिग्रहम् ॥ ६ ॥

आपणिकः—

कालमियन्तं यत्तर्पयसे सुवासमाघ्राय घ्राणम् ।
भोजनार्धमितमूल्यमदत्त्वा नैतद्धातव्यं स्थानम् ॥ ६ ॥

निर्धनः—

अकिञ्चनोऽहं मूल्यं दातुं शक्नोमि न न च वाञ्छामि ।
न हि याचितुमिदमुचितमपि स्यान्मूढमतिं त्वां गणयामि ॥ ८ ॥

आपणिकः—

रे मन्दात्मन्नधिक्षिपसि मां तद् भुङ्क्ष्व स्वाविनयफलम् ।
योऽयमिहैति हि रक्षापुरुषः स दर्शयेत् त्वां स्वभुजबलम् ॥ ९ ॥

[ततः प्रविशति रक्षापुरुषो दण्डहस्तः]

रक्षापुरुषः—(उभौ प्रति)

रे रे कितवौ किं विवदेथे सार्वजनिक इह राजपथे ।
वस्तुं वाञ्छा कारागारे किमित्यस्तमितदयाकथे ॥ १० ॥

निर्धनः—(रक्षापुरुषं प्रति)

अयि करुणाकर मा कुरु कोपं मा दण्डय मां दुर्जनजनम् ।
रुणाद्धि मामयमापणिकः पथि मार्गति गन्धकृते च धनम् ॥ ११ ॥

आपणिकः—(रक्षापुरुषं प्रति)

भो न्यायप्रिय राजपुरुष मम पक्वान्नानामयममुना ।
घ्रातो गन्धो न पुनर्मूल्यं दत्तमितीयं कदर्थना ॥ १२ ॥

रक्षापुरुषः—(आपणिकं प्रति)

युक्तमाह खलु भवानवश्यं तथापि तृप्तिः करणीया ।
दानं सुसदृशमनेन ददता साधुरीतिरनुसरणीया ॥ १३ ॥

(निर्धनं प्रति)

एहि भद्रमुख नाणकयुगलं गृहाण घर्षय परस्परम्।
सपदि जनय क्षणक्षणायितं कुरु महात्मनोऽस्य श्रवणचरम् ॥ १४ ॥

(निर्धनेन तथा कृते आपणिकं प्रति)

त्वदन्नगन्धं चिरं जिघ्रतो घ्राणमस्य किल तृप्तिमितम् ।
तन्नाणकक्षणक्षणायितेन श्रवणयुगं तव संतृप्तम् ॥ १५ ॥
लब्धं मन्ये त्वया सर्वथा गन्धमूल्यमनुरूपमिदम् ।
गच्छ समाश्रय विपणिं मा भव सकलमिलितजनहास्यपदम् ॥ १६ ॥

निर्धनः—(रक्षापुरुषं प्रति)

देवदूत इव भासि नयपटो !

आपणिकः—

मूर्खशिरोमणिरहं कथम् !

रक्षापुरुषः—(आपणिकं प्रति)

मा विमना भव विनयमुपाश्रय मा पुनरनुसर कलहपथम् ॥ १७ ॥

आपणिकः—(उभौ प्रति)

युवामिदानीमुपयातौ मम साक्षित्वमिति भो इत एतम् ।
मदन्नसेवनतर्पितरसनौ सुखेन सदनं प्रति यातम् ॥ १८ ॥

सर्वे—(श्रोतॄन् प्रति)

शृणुत शृणुत भो जनाः समस्ता वच इदमस्माकं सारम् ।
मा विवदध्वं मा विवदध्वं मा विवदध्वं परस्परम् ॥ १९ ॥

II. Dissolve and name the compounds :—

अकिञ्चनः, रक्षापुरुषः, राजपथे, अस्तमितदयाकथः, न्यायप्रिय, श्रवणचरम्, विमनाः and अनुरूपम्. (

III. Give single derivative words for:— (10)

(1) A grammarian (from व्याकरण), Muddy (from पङ्क), A traveller (from अध्वन्), Relating to the rainy season (from प्रावृष्), Paternal uncle (from पितृ), Cooks well (from पचति), Manifold (from बहु), Eminent for knowledge (from विद्या), A small hut (from कुटी), Proud (from अहम्).

IV. (*a*) Join the following:—

गुह् + सु, मस्ज् + त्वा, द्विष् + तातिः, नह्, + तुम्, गिर् + पतिः, तदा + ऋषिः + ऋच्छति, अप् + जन्तुः, पुंस् + कोकिलः. (10)

(*b*) What do you mean by पररूपसन्धि and प्रगृह्य vowel ? Give instances. (4)

V. (*a*) What Causals are always conjugated in the Parasmaipada ?

(*b*) What roots change their vowel to आ before the इ or अय of the Causal? (6)

VI. (*a*) Translate into Sanskrit:— (19)

I speak not to disprove what Brutus spoke,
But here I am to speak what I do know.
You all did love him once–not without cause.
What cause withholds you, then, to mourn for him

(*b*) With daily scrutinizing ken
Let every man his actions try,
Enquiring " What with brutes have I
In common, what with noble men ? "

Group XVII.

I. Translate into English :— (35)

(*a*) राजानस्तु मदाध्माता गजा इव निरङ्कुशाः ।
छिन्दन्ति धर्ममर्यादाशृङ्खलां विषयोन्मुखाः ॥ १॥
तेषां ह्युद्रिक्तचित्तानामभिषेकाम्बुभिः समम् ।
विवेको विगलत्योघेनोह्यमान इवाखिलः ॥ २ ॥
क्षिप्यन्त इव चोद्धूय चलच्चामरमारुतैः ।
वृद्धोपदिष्टशास्त्रार्थरजोमशकमक्षिकाः ॥ ३ ॥
आतपत्रेण सत्यं च सूर्यालोको निवार्यते ।
विभूतिवात्योपहता दृष्टिर्मार्गं च नेक्षते ॥ ४ ॥
ते ते च विपदं प्राप्ता माऽरमोहितचेतसः ।
जगद्विजयिनोऽपीह राजानो नहुषादयः ॥ ५ ॥

(*b*) वत्स पाण्डव, सन्ति बहवो राजधर्माः । विशिष्यते तेषु प्रजापालनम् । तत्र सम्यगवस्थितस्य नरेश्वरस्य न परिहीयते श्रेय ऐहिकमामुष्मिकं च सत्स्वसत्स्वप्यन्येषु धर्मेषु । तदभावे तु मोघप्रयासकमेव सर्वमपि धर्मान्तराणाम्। राजशब्दोऽपि रञ्जनेन विना कथमर्थवान् स्यात् । तेन च नातिमृदुना नाति-

तीक्ष्णेन वा भवितव्यम् । अतिमृदोर्मस्तकमारोहति हस्तिन इव हस्तिपकः । अतितीक्ष्णात्तु महोरगादिव नित्यमुद्विजेल्लोकः । अतो वसन्तभानुरिव मृदुतीक्ष्णान्तरवर्ती शाधि पृथिवीम् । मा भूः कार्येष्वालस्यवान् । न ह्यलसस्य वदनेऽपि वसति लक्ष्मीः, किं पुनः सदने । मा च भूरनिश्चितबुद्धिरर्थेषु । उत्तानस्वभावं स्वामिनं पेशलकल्पैर्वादैर्व्यामोह्य गृध्रशृगालन्यायेन स्वार्थसाधनायोत्तिष्ठेरन्वाक्योयुक्तिकुशलाः । अतः सागरेणेव सर्वत्र सुगभीरेण सदा सदाचारवता च भाव्यम् ।

II. (*a*) Dissolve and designate the following compounds:—

सरसिजम्, सरजसम्, परासुः, यद्भविष्यः and मासावरः.

(*b*) Use compounds for:—

(1) One whose eyes are glistening with wonder.

(2) First captured and then released.

(3) According to seniority. (8)

III. Give:— (9)

(*a*) The feminines of क्षत्रिय, भव and श्वन्.

(*b*) The comparatives of क्षुद्र, गाढ and उरु.

(*c*) Sanskrit equivalents for 91 st, 2753, in three ways.

(*d*) As many Sanskrit words as you can for (1) A god. (2) Fire. (3) Quickly.

VI. Write down:— (6)

Nom. Sing. of रै, अहन्, तुरासाह्. Accu. Plu. of गो, प्रधी *f.*, पथिन्, शासत्, *n.* Instru. dual. of दिव्, अनडुह्, इदम् *m*, Loc. Sing. of ग्रामणी, जरा, पूर्व *m*. Voc. Sing. of क्रोष्टु, उशनस्, अम्बा.

V. (*a*) Give:—Pres. 3rd Per. Plu. of शद्, ह्वे (Pass,), जागृ, क्री (Act. and Pass.), भी. Imperative 2nd Per. Sing. of स्तम्भ् अस् 2 P, शास्. Perf. 2nd Per. Sing. of क्षुद्, नश्, श्वि. Cond. 3rd Per. Sing. of बन्ध्, तृप्. Imperfect 3rd Per. Sing. of जि, पा. Past. Pass. Parti. of वे, हा, अद्. Future Parti. of श्रु, घ्रा (Pass.), दृश्. (14)

(*b*) Distiuguish clearly betweeu:—

आकृष्टधनुः - आकृष्टधन्वा; तृतीयाः–त्रितयाः; राजवान्–राजन्वान्; युवति–युवती; समाजः–समजः

IV. Translate into Sanskrit:—

युधिष्ठिर was very sad; he did not think his brothers could be in that evil place, and he was turning away when he heard a piteous cry :—"Stay, O king, stay for a little while; sweet is thy presence to us, O Bharata". From every side came these mournful cries; and **युधिष्ठिर,** who was ever compassionate stood still. It seemed to him that he knew the voices, and he asked:---" Who are you ? Why are you here " ? " I am **कर्ण,** " "I am **भीम,**" "I am **अर्जुन** " " I am **नकुल,** " " I am **द्रौपदी.** " Thus spoke the mournful voices round him. **युधिष्ठिर** turned in anger to the messenger of the gods. " Go back " said he, " to those whose messenger thou art. Tell them I shall not come back to where they are; I shall stay even here with these brothers of mine, that they may be comforted. " And he turned into the darkness again. (22)

Group XVIII.

I. Translate into English:—

(*a*) आसीत् पुरा गण्डकीसंनिधाने प्रचुरतृणाङ्कुरा कापि महती स्थली । तस्यां गोरक्षणोपजीवमाना बहवो गोपाः सपरिवारा वसन्ति । तेषामेको गोपः शलभनामा तत्रैव जातस्तत्रैव वर्धमानोऽदृष्टपुरुषव्यवहार एव युवा बभूव । एकदा तस्य मातरं जरतीं गोपीं रुजा पीडितां दृष्ट्वा गोपवृद्धा ऊचुः । अरे शलभ, तव माता जरती त्वदेकगतिः कथं दुर्बला । कथमेनां न पुष्णासि । पोषणसाध्यं हि वृद्धानां शरीरधारणम् । तस्याः पोषणं सावधानतया कुरु । शलभस्तु मातृस्नेहपरवशो गोपोषणपदार्थव्युत्पन्नो बालिश एव गोपोषणपरिपाट्या गोपुच्छलोमाचित्रितदाम्ना तां जरतीं मातरं गले बद्ध्वा तद्देहं करीषाग्निधूमबहुलं कुर्वाणो घासकवलप्रदानेन तस्याः पोषणपरायणो बभूव । सा च तन्माता वराकी जरती तथा पराभवमनुभवन्ती

कण्ठगतप्राणा कृतार्तनादा त्रायन्तां गोपास्त्रायन्तामित्युच्चैरुवाच । ततः प्रातिवेशी-गोपैरागत्य सा बन्धनाद्विमुक्ता तत्पुत्रश्च निर्भर्त्सितः । (15)

(*b*) हा हन्त दिवं गतोऽस्माकं प्रियो भ्राता निजगुणगरिम्णा समाकृष्येव नोऽन्तरङ्गाणि सर्वेषाम् । युक्तं खलु नः शोकानले प्रक्षेप्तुमात्मानं तस्य महात्मनः कृते । परं ध्रुवो हि मृत्युर्जातस्येति शोकभारं लघूकर्तुं प्रयतितव्यमेवास्माभिः । विशेषतस्तु गुर्वीं राज्यधुरां वहद्भिः प्रजाः समाश्वासनीया इति नैव शोकाकुलैर्भवितव्यम् । अत एव दुस्तरमपि शोकसागरमुत्तीर्य राज्यशकटस्यास्यैकाकिनैवोद्वहनं सुदुष्कर-मिति भ्रातृजायामिमामद्य गृहिणीपदमधिरोपितवन्तो वयम् । इतः परं सहधर्मिणी-यमस्माकं स्वामिनी चास्य बलाढ्यस्य राष्ट्रस्य संजाता । अद्यैव खलु विवाह-मङ्गलमिदं निर्वर्तयतामस्माकं हृदयान्तरे सममेव पदं क्रियते हर्षविषादाभ्याम् । कीदृशी खलु शोचनीया समवस्था चित्तस्येत्येतद्वर्णनविषयमपि नावतरितुमर्हति । भ्रातृवियोगदुःखेन हि गलति नेत्रादेकस्मादविरलाश्रुधारा । अन्यस्मिंस्तु प्रादुर्भवति दारपरिग्रहकरणेनानन्दबाष्पविसरः । एकतः श्राद्धक्रिया प्रचलति । अन्यतस्तु वि-वाहमङ्गलं प्रतायते । इदं किल सुखदुःखयोरपूर्वं मिश्रीकरणं न केवलं ममैवाभि-मतं परं भवादृशां बुद्धिमतां ज्ञानवयोवृद्धानामपि रुचयेऽभूदिति सुमहान् समुन्मीलति मे चेतसि प्रसादः । (20)

II. Give Perfect and Imperfect 3rd per. Sing. of:—

(*a*) चक्ष्, ली (9th class), तृह्, भा.

(*b*) Periphrastic Future and Aorist Pass. 3rd Per. Sing. of:—तॄ, स्पृश्, गुह्; कृत्.

(*c*) Conditional, 3rd Per. Sing. of:—ह्वे, संगम्, क्लृप्, पराजि (Passive).

(*d*) Causal (Present) and Imperative 2nd per. Sing of:- सो, अधी, and दरिद्रा.

(*e*) Past Participles of:—क्षै, प्रवस्, अद्, प्रणश्, and absolutives of तॄ, मस्ज्, स्था with उद् (causal).

(*f*) State what forms the following are:—अवात्त, घ्रायते चक्रण्वांसः, नेदिष्ठ, असूम, धक्ष्यति, ईप्सति, दोहिष्ठ, स्फावयामास. (20)

III. (*a*) Name and dissolve any six of the following compounds;—पञ्चपदी, यूपदारु, गतागतः, दक्षिणापूर्वा, सरसिजम्, पश्चार्धः, उदधिः, अनुपदम्, यावज्जीवम् and जन्मान्तरम्.

(*b*) Distinguish between:—क्षत्रिया—क्षत्रियाणी, त्वां तृणं मन्ये and त्वां तृणाय मन्ये, अश्लिषत्, and अश्लिक्षत्. (7)

IV. Give Nom. Sing. of मथिन्. अन्यतम *n.* and plur, of:—महत् *n.*, द्वितीय *m.*

Acc. plur. of:—तितीर्वस् करिष्यत्, बिभ्रत् *n.*

Abla. plur. of:—मांस, विश्, दधृष्, दिव्.

Loc. Sing. of:—चिक्रीर्वस्, दधि, मघवन्, द्यो, क्रोष्टु.

And plur. of:—पुर्, पुंस्, सम्राज्. (8)

V. Translate into Sanskrit— (30)

(*a*) There's many a slip between the cup and the lip.

(*b*) What men can possibly know the mysterions ways of fate ?

(*c*) He desolated the whole country, pulling down houses, driving away the people, and burning their possessions.

(*d*) Something is better than nothing.

(*e*) A barber was once passing under a haunted tree, when he heard a voice say: " Wilt thou accept of seven jars of gold ? " The barber looked round but could see no one. The mysterious voice again repeated the words, and the cupidity of the barber being greatly roused by the spontaneous offer of such vast wealth, he spoke aloud " When the merciful God is so good as to take pity even on a poor barber like me, is there anything to be said as to my accepting the kind offer so generously made ? " At once the reply came: " Go home, I have already carried the jars thither. " The barber ran in hot haste to his house, and was transported to see the promised jars there.

Group XIX.

I. **Translate into English :—** (35)

(*a*) इह खलु लब्धजन्मानः सर्वेऽपि प्राणिनः स्वातन्त्र्यमभिलष्यन्ति मन्यन्ते च परावलम्बनं नाम माध्वीकलेशाक्तस्य कृपाणप्रान्तस्यावलेहनमेवेति । ये तु प्रतिव्यवसायं परानेवावबलम्बमानास्तानेवात्मन ईश्वरान्मन्यन्ते ते खलु सुसाधमप्यात्मनः कार्यमनुष्ठातुमनीश्वराः प्रतिक्षणमनर्थपरंपराभिरभिभूयन्ते । को वा परमुखे कवलं विनिक्षिपन्नात्मनः क्षुधं शमयेत् कश्च सर्वदा परावलम्बनेनैव संपादयेत् कार्याणि । आत्मावलम्बिनो निरालस्या यथावसरं प्रभवन्ति कार्याणि स्वानि निर्वर्तयितुं न पुनः परावलम्बिनोऽलसाः । नूनमिदं परावलम्बनं नाम प्राणिनां निगूढानर्थं बन्धनम् ।

(*b*) अस्ति किंनरगन्धर्वविद्याधरनिषेवितः ।
चक्रवर्ती गिरीन्द्राणं हिमवानिति विश्रुतः ॥ १ ॥
माहात्म्यामियतीं भूमिमारूढं यस्य भूभृताम् ।
यद्भवानी सुताभावं त्रिजगज्जननी गता ॥ २ ॥
उत्तरं तस्य शिखरं कैलासाख्यो महागिरिः ।
योजनानां सहस्राणि बहून्याक्रम्य तिष्ठति ॥ ३ ॥
मन्दरो मथितेऽप्यब्धौ न सुधासिततां गतः ।
अहं त्वयत्नादिति यो हसतीव स्वकान्तिभिः ॥ ४ ॥
चराचरगुरुर्यत्र निवसत्यम्बिकासखः ।
गणैर्विद्याधरैः सिद्धैः सेव्यमानो महेश्वरः ॥ ५ ॥
पिङ्गोत्तुङ्गजटाजूटगतो यस्याश्नुते नवः ।
संध्यापिशङ्गपूर्वाद्रिशृङ्गसङ्गसुखं शशी ॥ ६ ॥
येनान्धकासुरपतेरेकस्यार्पयता हृदि ।
शूलं त्रिजगतोऽप्यस्य हृदयाच्चित्रमुद्धृतम् ॥ ७ ॥
चूडामणिषु यत्पादनखाग्रप्रतिमाङ्किताः ।
प्रसादप्राप्तचन्द्रार्धा इव भान्ति सुरासुराः ॥ ८ ॥

II. (*a*) Parse fully the words underlined in 1 *a* and *b*. (5)

(*b*) Distinguish between:—उद्स्थात् and उदास्थत्, अगात् and अगासीत्, समाज्ञः and समजः (3)

(*c*) Give Dat. Sing. of नौ, सुभ्रू, वधू, शुचि (*n.*) Gen. Plu. of सेनानी, भिषज्, प्रावृष्. Nom. Sing. of तक्ष्, भूवाह्, गिर्, अरुस् (*m.*) (6)

III. Give—Imperative 2nd Per. Sing. of अस्, द्विष्, शास्, प, क्षुद्. Pres. 3rd P. Plu. of युज्, मा, निज्, हु, स्तु. Perf. 3rd P. Sing. of ध्यै, ली वह्, ह्वे, भी. Conditional 1st P. Sing. of गाह्, रुध्, भी, स्कन्द्. (8)

(*b*) What forms are the following?:—

पित्सते, तोष्टूयते, चक्रत्या, दध्म, आशुषः, विलाय, नोभिः, अभाजि. (4)

IV. Name and dissolve the following compounds :— (6)

अतिमालः; पारेगङ्गम्; धनपरः;समित्पाणिः;दुःखातीतः; धर्मपथः.

V. Translate into Idiomatic Sanskrit :— (10)

(1) I got angry and my words went home to his heart.
(2) The bloom of youth lasts for a few days.
(3) Seeing him dead, Indumati tore her hair for Grief.
(4) While we were thus talking, sleep gently stole upon her eyes.
(5) I was sorry to see Sita becoming leaner and leaner every day.

V1. Illustrate the use of the following by framing sentences:-

परितः, अलं, प्रभृति; धृ. क्लृप्.

VII. Translate into Sanskrit:— (17)

A fisherman skilled in music took his flute and his nets to the sea-shore. Standing on a high rock, he played several tunes, in the hope that the fish, attracted by his melody, would, of their own accord, dance into his net wich he had placed below. At last, having long waited in vain, he laid aside his flute, and casting his net into the sea, drew out many fish. When he saw them leaping about in the net upon the

rook, he said, "O you most perverse creatures! when I piped you would not dance, but now that I have ceased piping, you, dance so merrily"

Group XX.

1. (*a*) Name fully, in as many distinct ways as you can, each of the following forms:—

अभक्ष्यम्, अपित्सन्, धक्ष्यति, शासति, व्यासे, अनागाः, व्यास, अपेयात्, अनड्, स्याम, आर्जिनात्, अपायि. (10

(*b*) Give compounds for:—

(१) कुत्सितः सखा, (२) तिस्रो वा चतस्रो वा, (३) शोभना दन्ता यस्याः सा, (४) द्विर्गता आपो यस्य तत् , (५) समानः पतिर्यस्याः सा (5)

II. (*a*) Give the feminine forms of त्रिंशत्, शिश्रिवस्, स्थल, यत्र, शूद्र and अरण्य with their meanings. (5)

(*b*) Distinguish clearly between :—

(१) एकदन् – एकदन्तः, (२) दास्याः पुत्रः – दासीपुत्रः, (३) द्व्यहः – द्व्यह्नः. (४) सुगन्धम् – सुगन्धि (५) चन्द्रमुखः – मुखचन्द्रः. (5)

III. (*a*) Translate into English:— (18)

पुत्रमागतमवलोक्य सापि रहस्येवमभ्यधित । अयि पुत्रक, मूढमते ! किमेवमकार्यमनुष्ठितं त्वया निजपितरं राजानं मां च नाटकदर्शनव्याजेनाहूय महान्तमावयोर्मनःखेदमुत्पादयता । अनेन तवाविनयेन नितान्तं क्रुद्धस्तव पिता मामिदानीमेवमादिक्षत् । " दुर्मेधसास्मत्पुत्रेण बह्वपराद्धं मयि यन्मन्दमतिरेष राजानमपि मां तृणाय मत्वा नाटकापदेशेन दोषं ममोद्घाट्यं निरतिशयां मे हृदयव्यथामतानीत् । यदीतः परं मन्मनःपीडावहमीदृशमनार्यजुष्टमाचारिष्यति चरितं तन्नियतमहमेनमतितीव्रेण दण्डेन योजयिष्यामि " इति । तत्पुत्रक ! किमेवं जननीपतिमत एव भवत्पितरं दैन्यमारकदेशाधीश्वरं प्रकोपयस्येवंविधैर्दुश्चरितैः

(*b*) Dissolve and name the compounds underlined in the above passage. (4)

IV. Give:—Imperfect 2nd Per. Sing. of ब्रू, ऋ, हिंस्, स्तम्भ्. Perfect 2nd Per. Sing. and Plu. of गुह्, भृ, दृप्. Pres. 3rd Per. Sing. of तन् Desi., क्षै Caus., जभ्, त्विष्, (All Conj.) ;(11)

V. Translate into Sanskrit :— (10)

1 How long had he been staying there ?

2 The less you think of your lost son, the less will be your sorrow.

3 It is to-day ten months since the death of my father.

4 Prevention is better then cure.

VI Translate into English :— (22)

कथय मे सुभगे ! नदि सत्वरं
कुत इमानि जलानि वहन्ति ते ।
वद वद क्व नु मन्दगतिः शुचा
व्रजसि केन बलाद्नु नीयसे ॥ १ ॥

मम विलोक्य दशां विधुरामिमां
किमिति वत्स वृथा विमनायसे ।
क्व हि मदीयमिदं व्यसनं महत्
क्व च तदुद्धरणेऽक्षमता तव ॥ २ ॥

सुविदिता जननी मम शैलभू-
र्दिवि विराजति वारिधरः पिता ।
द्रुमकुसुमावरणा वननिर्झराः
सुसलिला विलसन्ति सहोदराः ॥ ३ ॥

अथ कदाचिदहं निजसद्मनो
द्रुतपदं सहसैव विनिर्गता ।
तदनु खेलगतिर्मृदुहासिनी
विहृतिमात्रमतिः पुरतोऽसरम् ॥ ४ ॥

निजपदं प्रविहाय समुन्नतं
सरभसं पतिताहमधो नवे ।

प्रियसखीवदुधारयतां तुमाम्
　　सपदि तीरभुवो तृणभूषिते ॥ ५ ॥
निदधती सविलासमहं तदा
　　मितामितानि पदानि शनैः शनैः ।
विटपिभिर्मृदुरक्तसुमाधरे—
　　रसरुदेव नतैः परिचुम्बिता ॥ ६ ॥
अवसितान्यखिलान्यपि संप्रति
　　मम सुखानि विपत्तिरुपास्थिता ।
अयमसौ जलधिर्विततानना
　　ह्वयति मां ननु पश्य जिघत्सया ॥ ७ ॥

II. Translate into Sanskrit :— (10)

The forest tree that stands alone,
Though huge and strong and rooted fast,
Unable long to brave the blast,
By furious gusts is overthrown:
While trees that, growing side by side,
A mass compact together form,
Each sheltering each, defy the storm,
And green from age to age abide.

Group XXI.

I. Dissolve and designate all the compounds occurring in the following :— (10)

(१) सुपथा गच्छतस्तेऽविघ्नमस्तु ।

(२) क्षणपरिचयोऽपि सतां शताहजात इवानन्दयति मन्मानसम् ।

(३) रात्रिंदिवं गन्धवहः प्रयाति ।

(४) तत्कार्यं कर्तुकामाः सर्वेऽप्यहमहमिकया प्रदोष एव प्रतस्थिरे ।

II. Correct the following, giving reasons :— (10)

(*a*) वरमरण्येऽधिवस्तुं न पुनर्दारास्तावमानं सोढुम् ।

(b) पारितोषिकमाददाति तस्मिन् किं वृथाभिद्रुह्यसि ।

(c) हारीतेन तं शुकमाश्रमं नीत्वा तत्र षड्रसान्नेन भोजितः ।

III. (a) Give:—Pres. Pass. 3rd Per. Sing. of जागृ, पा, घस्, यज्, ऊह् with सम्, दरिद्रा, अज् and शी.

(b) Caus. Pres. 3rd Per. Sing. of जभ्, गुप्, दुष्, वा, स्मि. with वि, and रुह्.

(c) Imperative 2nd Per. Sing of:—क्षुभ्, मि, तृप्, प, गुह् and संगम्.

(d) Infinitive of purpose from नश्, भी Caus., ली, ऋ Caus. नह्, ब्रू and चक्ष्.

IV. Quote or frame sentences illustrating the idiomatic uses of the following :— (8)

अधीतिन्, उपरि, मद् with प्र, उत्तरेण and प्र + भू 1 P.

V. Translate into English:— (30)

(a) प्रस्थानमङ्गले प्रणामायोपगतं चन्द्रापीडं विलासवती मन्युरागावेगगद्गदिकोपरुध्यमानाक्षमरवादीत् । 'तात, युज्यते ह्यङ्कलालितस्य गर्भरूपस्य प्रथमगमने शरीयसी हृदयपीडा । मम पुनर्नेदृशी प्रथमगमनेऽपि ते पीडा समुत्पन्ना, यादृशी तव गमनेनाधुना । दीर्यत इव मे हृदयम् । निर्यान्तीव प्राणाः । न किंचित्समादधाति धीः । सर्वमेव शून्यं पश्यामि ! धृतोऽपि बलादागच्छति मे बाष्पोत्पीडः । मुहुर्मुहुः समाहितापि मङ्गलसंपादनाय ते चलति मतिः । किंनिमित्तं चेयमीदृशी मे हृदयपीडेत्येतदपि न वेद्मि । किं बहुभ्यो दिवसेभ्यः कथमप्यागतो मे वत्सो झटित्येव पुनर्गच्छतीति । उत वैशम्पायनवृत्तान्तादात्मन एव दुःखितनयेति । न चैवंविधयापि पीडया वैशम्पायनानयनाय गच्छतस्ते गमनं निवारयितुं पारयति वाणी । हृदयं पुनर्नेच्छत्येव त्वदीयं गमनम् । तदीदृशीं मे पीडां विज्ञाय यथा पुरा स्थितं, न तथा क्वचिदासङ्गमावध्यातिदीर्घकालमायुष्मता स्थातव्यम् । अस्य चार्थस्य कृते साञ्जलिबन्धेन शिरसाभ्यर्थये वत्सम्' ।

(a) अधोऽधः पश्यतः कस्य महिमा नोपजायते ।
उपर्युपरि पश्यन्तः सर्व एव दरिद्रति ॥ १ ॥

(c) यदन्यैर्विहितं नेच्छेदात्मनः कर्म पूरुषः ।
न तत्परेषु कुर्वीत जानन्नप्रियमात्मनः ॥ १ ॥

(*d*) पश्यन्नपि भवत्यन्धः पुमान् रागावृतेक्षणः ।
सुहृद्वैद्याश्चिकित्सन्ति निर्मलैर्विनयाञ्जनैः ॥ १ ॥

(*e*) धर्मार्थं क्षीणकोशस्य कृशत्वमपि शोभते ।
सुरैः पीतावशेषस्य शरद्धिमरुचेरिव ॥ १ ॥

VI. Translate into Sanskrit :— (28)

(*a*) Temporal blessings are like foam upon tho water; youth passes like a shadow; riches disappear like clouds before the wind. Therefore to virtue alone should we hold fast.

(*b*) A virtuous man ought to be like the sandal-tree which perfumes the axe that destroys it.

(*c*) As stones rolled up a hill with toil and pain,
Come quickly bounding backward o'er its side;
'Tis hard the top of virtue's steep to gain,
But easy down the slope of vice to glide.

(*d*) Wealth either leaves a man, O king !
Or else a man his wealth must leave.
What sage for that event will grieve,
Which time at length must surely bring ?

Group XXII.

I. Translate into English :— (25)

(*a*) गतायां च तस्यामस्तमुपगतवति भगवति सवितरि तिमिरेणावष्टभ्य-माने जीवलोके, किंकर्तव्यतामूढा तामेव तरलिकामपृच्छम् । ' अयि तरलिके ! कथं न पश्यसि दृढमाकुलं मे हृदयम् । अप्रतिपत्तिविह्वलानि चेन्द्रियाणि । न स्वय-मण्वपि कर्तव्यमलमस्मि ज्ञातुम् । उपदिशतु मे भवती यदत्र सांप्रतम् । अयमेव त्वत्समक्षमेवाभिधाय गतः कपिञ्जलः । यदि तावदितरकन्यकेव विहाय लज्जाम्, उत्सृज्य धैर्यम्, अवमुच्य विनयम्, अचिन्तयित्वा जनापवादम्, अतिक्रम्य सदा-चारम्, उल्लङ्घ्य शीलम्, अवगणय्य कुलम्, अङ्गीकृत्यायशः, रागान्धवृत्तैरनु-

ज्ञाता पित्रा, अननुमोदिता मात्रा, स्वयमुपगम्य ग्राहयामि पाणिम्। एवं गुरु-जनातिक्रमादधर्मो महान्। अथ धर्मानुरोधादितरपक्षावलम्बनद्वारेण मृत्युमङ्गीकरो-म्येवमपि प्रथमं तावत्स्वयमागतस्य प्रथमप्रणयिनस्तत्रभवतः कपिञ्जलस्य प्रणय-प्रसरभङ्गः। पुनरपरं यदि कदाचित्तस्य जनस्य मत्कृताद्गाशाभङ्गात्प्राणविपत्ति-रुपजायते तदपि मुनिजनवधजनितं महदेनो भवेत्' इत्येवमुच्चारयन्त्यामेव मय्या-सन्नचन्द्रोदयजन्मना विरलविरलेनालोकेन धूसरतां वासवी दिगयासीत्।

(*b*) आलोकसंपदुपयाति तमो व्यपैति
चैतन्यमभ्युदयति क्षयमेति निद्रा।
भास्वानुदेति लघवोऽप्यपयान्ति तारा
वृद्धिक्षयौ सदसतोर्दिवसस्तनोति ॥ १ ॥ (*4*)

(*c*) भवत्ववितथा नाम वागुक्तानृतवादिना
नैव विश्वासपदवीं सारोहेज्जातु कस्यचित् ॥ १ ॥ (*3*)

II. Name and dissolve the compounds underlined in I. *a*, *b* and *c*. (6)

III. Give the Nom. & Acc. Plu. & Loc. Sing. of:— (6)
यात् *f*, अहन्, अन्वच् *n*, एतद् *f*, सखि, अर्वन्, सीमन्, and स्त्री.

IV. Write down :— (7)
(*a*) Imperfect 2nd Person Plural of :—जभ्, यस् with सम्, हन् with आ, दरिद्रा, वश्, मा and हा to abandon.
(*b*) Imperative 2nd Pers. Sing. and Plu. of :—भी, शास्, इन्ध्, हु, स्तम्भ् (9th).

V. Give :— (7)
(*a*) Perfect 2nd Plu. of :—श्रि, भ्रस्ज्, क्षम्, त्रप्, दरिद्रा, फण्.
(*q*) Aorist 2nd Sing. of:— ह्वे, दृप्, स्रंस्, स्था with प्र, ग्रह् and तन्.
(*c*) Causative and Desiderative present 3rd Sing. of:— भी, रुह्, स्मृ and नश्.

VI. Quote or frame sentences illustrating the use of (1) निर्धारणे षष्ठी. (2) अथ in its various senses. (3) अपवर्गे तृतीया. (4) मन्थ् governing two accu. (Pass. Constru.) (8)

VII. Say exactly what forms the following are :—अस्थः, अर्थ्येथाम्, ऊष, क्षपयामासिषे, व्यतितरिषतम्, ग्राहिषीष्ट, पात्या:. (6)

VIII. Translate into Sanskrit :— (18)

(1) That gain which brings loss is not to be highly esteemed; but the loss which brings gain in to be greatly valued even though it be a loss.

(2) Oft ill of good the semblance bears,
And good the guise of evil wears:
So loss of wealth, though bringing pain,
To many a man is real gain;
While wealth to others proves a bane;
Its hoped-for fruits they seek in vain.

IX. Under what circumstances do the following roots become Atmanepadin:—स्था, चर्, क्री and यम्? Quote sentences to illustrate your answer. (10)

Group XXIII.

I. Translate into English:— 30.

अथ किंचित् स्रोतः समुल्लङ्घमानोऽस्य तुरङ्गः कस्यापि दोधूयमानेतरोः शाखया तथाभिहतो यथोच्छलन् भूमौ पपात सादिनं चैकतः समपीपतत् । किन्तु तत्क्षणादेव सादी समुत्थितो वाजिनो वल्गां गृहीत्वा सचुचुत्कारं ग्रीवां पृष्ठं चास्फोट्याज्ञासीद् यदश्वः स्वेदैः स्नातोऽस्तीति, तच्चक्षुषी विस्फार्य पार्श्वस्थपलाशिनं निपुणं निरीक्ष्य तच्छाखायामेव कानिचिन्निजवस्तून्यासज्य दक्षिणकरधृतरश्मिरश्वं शनैः शनैः परिभ्रमयितुमारेभे, अश्वश्च फेनान् पातयन् कन्धरामुद्धूनयन् हैषारवैश्चिरपरिश्रमं प्रकटयन् प्रस्यन्दजलसिक्तभूभागः समुत्सृष्टपुरीषः शुष्कस्वेदो मुहूर्तार्द्धेनैव विस्मृतपरिश्रमः सगातिस्तम्भं खुराग्रैर्भूमिमुत्खनन्, कर्णावुत्तम्भयन्, लाङ्गूलं लोलयन्, सादिनो दक्षिणदेशे पृष्ठं निकटयन् पुनरेनं वोढुं, परतो धावितुं च समीहां समसूसुचत् । तावदकस्मात् पूर्वस्यामरक्तातिप्रलम्बातिभयानका सकडकडाशब्दं सौदामनी समदेदीप्यत, तच्चमत्कारचकितं चाश्वमेष यावत्स्थिर-

याति तावत्ततडतडाशब्दं पूगस्थूलैर्बिन्दुभिर्वर्षितुमारब्ध मघवा। परं रामकार्यार्थं प्रतिष्ठमानेन मारुतेनेव न सह्यते कार्यहानिः शिववीरचरेण, तत्क्षणमेवासौ पुनः सज्जीभूय समुत्प्लुत्य घोटकपृष्ठमारुरोह, घोटकश्च पुनस्त्वरितगत्या प्रचलितः। यदा यदा विद्युद्विद्योतते तदा तदा पन्था अवलोक्यते, तदनुसन्धानेनैव वाहोऽयं शिलातलानि परिक्राम्यन्, लताप्रतानानि त्यजन्, स्रोतांस्युल्लङ्घमानो, गर्तांश्च परिजहदुच्चचाल। तावद् दूरत एवालोक्यत तोरणदुर्गदीपः, इतश्च चरस्यैतस्य दृढ-प्रतिज्ञतां, निर्भीकतां, सोत्साहतां, स्वामिकार्यसाधनसत्यसङ्कल्पतां च परीक्ष्येव प्रशशाम वृष्टिः, अम्लबलेन दुग्धमिव च खण्डशोऽभून्मेघमाला, ददृशे च पूर्वस्यां कलानाथः।

II. (*a*) **Dissolve and name the following compounds :—**
चतुःसूत्री, सतृणम्, निष्कौशाम्बिः, सुदती, अनुगङ्गम्, सधर्माणः, पुष्पधन्वा. (7)

(*b*) Express in Sanskrit:—(1) Eight times. (2) By 54 men. (3) From 728 women. (4) In 1917 A. D. (4)

III. (*a*) **Frame short sentences illustrative of the use of:——(4)**
अपि नाम, किमु, कामम्, कोऽर्थः

(*b*) **Name fully the following forms:—** (2)

व्यतिषजति, व्यवस्यन्, अपीप्यत, अजिहत.

IV Give:— (15)

(*a*) Imperfect 2nd Pers. Sing. of शी, क्री, with वि, चक्ष्, शास्, तृह्.

(*b*) Perfect 3rd Pers. Sing. of आस्, जन्, ऋच्छ्, मुह्, प्रच्छ्.

(*c*) 2nd Future 3rd Pers. Sing. of वस् to dwell, तृप्, नृत्, मन्,

(*d*) Past Passive Participles of अद्, दा with आ, व्रश्च्, क्षै.

(*e*) Indeclinable Past Participlec of श्वि with उद्, स्तम्भ्, witn वि, मन् with अव.

(*b*) Desiderative Present 3rd Pars. Sing. of इष्, लभ्, आप्.

V. Give:— (8)

(1) Nom. Sing. of दिव्, तुरासाह्, मथिन्, ऋभुक्षिन्.

(2) Acc. Plural of स्त्री, द्यो, युवन्, पपी, अस्थि.

(3) Loc. Sing. of अहन्, मूर्धन्, सोदिवस्, क्रोष्टु.

(4) Voc. Sing. of कर्तृ *n*., भ्रू, उशनस्, अम्बा.

Explain:—

(१) एधोदकस्योपस्कुरुते (२) संशय्य कर्णादिषु तिष्ठते (३) अध्ययनात्पराजयते बालः (४) पैतृकमश्वा अनुहरन्ते (५) अपस्किरते कुक्कुटो भक्ष्यार्थी.

VI, Translate into Sanskrit:— (16)

(*a*) The wicked demon carried off his beauteous wife for whom he had conceived an ardent passion and accomplished his purpose with the assistance of मारीच. Several days afterwards Hanumnt come to know that she was in Lanka and persuaded Rama to invade the island and kill the ravisher. The monkeys built a bridge across the ocean over which Rama with his numerous troops passed, conquered Lanka, and killed Ravana along with his whole host of demons. Rama, attended by his wife and friends, triumphantly returned to Ayodhya where he was crowned king by Vasishtha. He reigned long and righteously and was succeeded by his son Kusha. Rama is said to be the seventh incarnation of Vishnu.

(*b*) As soon as he gets up, instead of beginning his studies, he goes out to play. (4)

(*c*) Yesterday about 20 robbers attacked the house of a wealthy merchant in a village near Calcutta. Four of them were armed with guns (लोहनाडी), 9 with swords and 7 with bamboo sticks. (4)

———

Group XXIV.

I. Translate into English:-- (35)

जीर्णं पादत्रं प्रति कृपणस्योक्तिः

मा याहि भद्रमुख ! मामिह संविहाय
दुःखं कथं बत वियोगभवं सहिष्ये ।
हा हन्त ! जर्जरतनुर्जरयासि जात-
स्तारुण्यभूररुणिमापि लयं गतस्ते ॥ १ ॥

मा मा मनागपि विषण्णमनाः सखे भू-
स्त्वां शक्तिहीनमपि नैव परित्यजेयम् ।
आधारतां मम गतोऽसि यदद्य यावत्
स्नेहोचितं त्वयि चिरं चरितं चरेयम् ॥ २ ॥

भ्रान्तं त्वया खलु मया सह तेषु तेषु
देशेषु भद्र सजनेष्वपि निर्जनेषु ।
नक्तंदिवं विचरतोऽपि शरीररक्षा
यत्नैस्त्वया मम कृता सहयायिनैव ॥ ३ ॥

भ्रातस्त्वयानवरतं चरता मदर्थे
रथ्योद्गता चरणधूलिरपि प्रजग्धा ।
आवर्जितं च मम मानसमङ्ग नित्यं
स्वाङ्गेषु घर्षणवशात्तानिमानमेत्य ॥ ४ ॥

ये नाम केचिदुपला अपि कण्टकाश्च
पादक्षतिं मम चिकीर्षव आविरासन् ।
तैर्निष्ठुरं विरचिताः परुषाः प्रहाराः
सोढा मदंघ्रिकवचेन सखे त्वयैव ॥ ५ ॥

तैस्तैर्मदीयरिपुभिः कृतविग्रहस्त्वं
यद्भोः सखे मम कृते क्षतविग्रहोऽभूः ।
आर्तं तदात्मनिरपेक्षतयाभिरक्षन्
क्षत्रोऽसि मूर्त इति निश्चिनुते मतिर्मे ॥ ६ ॥

अङ्गं त्वदीयमपमृज्य मया करेण
धूलिप्रदिग्धमपि निर्मलतामनायि ।
छिद्रान्वितानि पिहितानि तथा क्षतानि
दत्त्वा मुहुर्व्रणविरोपणपट्टिकास्ते ॥ ७ ॥

नो केवलं चरणयोः करयोरपि त्वां
बिभ्रद्दयाकुलतया बहुशोऽहमाटम् ।
जाने गुणी गुणवता घृणिना घृणावान्
सेव्येन सेवकजनोऽपि हि सेवनीयः ॥ ८ ॥

हा हन्त हन्त जनिता तव चर्मकारो
जात्याधमो मलिनकर्मपरायणश्च ।
स्नेहान्वितः खलु भवांस्तु तथा सुरक्त—
इत्येव भोः प्रणयभाजनतां गतो मे ॥ ९ ॥

नैसर्गिकी सुदृढता क नु ते प्रयाता
किं सांप्रतं शिथिलतां भजसीदृशीं भोः ।
एतद्वदन्ति महतां तु कुलव्रतं यत्
प्राणात्ययेऽपि विकृतिं प्रकृतिर्न याति ॥ १० ॥

संघट्टनं सुचिरमेव तवानुभूय
मत्पादपद्मयुगलस्य गता त्वचाऽपि ।
एवं गतेऽपि तु वहंस्तव देहभारं
मन्ये कृतार्थमभवन्मम जन्म लोके ॥ ११ ॥

वार्द्धक्यदोषजनितव्यसनाभिभूतं
त्वां विस्मरेयमथवा यदि संत्यजेयम् ।
तन्मां कृतघ्न इति सर्वजना वदेयु-
र्मा भूत्त्वया मम कदापि सखे वियोगः ॥ १२ ॥

स्पृष्ट्वा त्वदङ्गमसकृत्परमादरेण
त्वत्प्रत्ययार्थमधुनैवमहं शपामि ।
रक्षाविधौ तव तनोर्न मनागपि स्यां
मन्दादरो यदि न विघ्नकरोऽन्तकः स्यात् ॥ १३ ॥

II. (*a*) Dissolve and name the compounds :—
तारुण्यभूः, नक्तंदिवम् , अनवरतम्, आत्मनिरपेक्षतया, मलिन-कर्मपरायणः. (5)

(*b*) Mention any ten Abstract nouns of the type of अणिमन् तनिमन् &c. (5)

III. (*a*) Pick out all the finite verbs in the above verses and assign conjugations and Padas to the roots thereof. (5)

(*b*) Give absolutives from the roots of the following forms:—प्रजग्धा, सोढा, आवर्जितम्, आविरासन्, प्रदिग्धम् पिहितानि, भ्रान्तम्, विराचिताः. (5)

IV. (*a*) Give Perf. 3rd Per. Sing. of the roots of the following forms:—क्षतः, प्रहारः, एत्य, बिभ्रत्, विग्रहः, हीनम्. (5)

(*b*) Give Imperative 2nd Per. Sing. and Cond. 3rd Per. Plu. of the roots of the following forms:—
अपसृज्य, चिक्रीर्षवः, विषण्णम्, भाद्दरेण, विघ्नः. (5)

V. (*a*) Give all kinds of Active participles from ग्रह् and हृ and Passive participles from स्तु and हन्. (10)

(*b*) Quote any lines from classical authors, similar in sense and wording to:—(1) Last two lines of the 10th verse. (2) Last line of the 12th verse, in Q. I. (5)

VI. Translate into Sanskrit:— (20)

(*a*) Thou mark'st the faults of other men,
Although as mustard seeds minute;
Thine own escape thy partial ken,
Though each in size a Bilva fruit.

(*b*) Renewed enjoyment never tames,
But rather more excites desire.
The more by oil or wood a fire
Is fed, the more it fiercely flames.

(*c*) **No day arrives, but as it flies,**
Of fear a hundred sources brings.
Of grief a thousand bitter springs,
To vex the fool,—but not the wise.

Group XXV.

I. (*a*) Translate into English:— (14)

स तु तीरं समासाद्य तमसाया मुनिस्तदा ।
शिष्यमाह स्थितं पार्श्वे दृष्ट्वा तीर्थमकर्दमम् ॥ १ ॥

अकर्दममिदं तीर्थं भरद्वाज निशामय ।
रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा ॥ २ ॥

ददर्श भगवांस्तत्र क्रौञ्चयोर्मिथुनं चरत् ।
तस्मात्तु मिथुनादेकं पुमांसं पापनिश्चयः ।
जघान वैरनिलयो निषादस्तस्य पश्यतः ॥ 3 ॥

तं शोणितपरीताङ्गं चेष्टमानं महीतले ।
भार्या तु निहतं दृष्ट्वा रुराव करुणां गिरम् ॥ ४ ॥

तथाविधं द्विजं दृष्ट्वा निषादेन निपातितम् ।
ऋषेर्धर्मात्मनस्तस्य कारुण्यं समपद्यत ॥ ५ ॥

(*b*) **Dissolve and name the compounds occurring in the 2nd and the 5th stanza in the above passage. Parse fully the word दृष्ट्वा in the last stanza. Write a note on the words तस्य पश्यतः in the 3rd stanza.** (7)

II. (*a*) Decline (1) द्वितीय *m.*, त्रिंशत्, उभ and निर्जर in the Ablative Sing. and Plu. (2) वात् *n.*, अन्यतम *m.*, नौ and श्वन् in the Nom. Sing. and Plu. (7)

(*b*) Give:—Pres. 3rd Per. Sing. of रुध्, विद् (7th Conj.), भू and स्था Perf. 3rd Per. Sing. of प्रच्छ्, कथ्, मस्ज् and लिप्.

Past Pass. Parti. of पिछ्, धुष्, भ्रम् & गै and the Absolutives of इष्, बन्ध्, यज् and शम्. (10)

III. (*a*) **Translate into English:—**

राजा—किमिदं शिष्योपदेशकाले युगपदाचार्याभ्यामत्रोपस्थानम् ।

गणदासः—देव श्रूयताम् । मया तीर्थादभिनयविद्या शिक्षिता । दत्तप्रयोगश्चास्मि । देवेन देव्या च परिगृहीतः ।

राजा—बाढं जाने । ततः किम् ।

गणदासः—सोऽहममुना हरदत्तेन प्रधानपुरुषसमक्षं "नायं मे पादरजसापि तुल्यः" इत्यधिक्षिप्तः ।

हरदत्तः—देव । अयमेव प्रथमं परिवादकरः । अत्रभवतः किल मम च समुद्रपल्वलयोरिवान्तरमिति । तदत्रभवानिमं मां च शास्त्रे प्रयोगे च विमृशतु । देव एव नौ विशेषज्ञः प्राश्निकः ।

राजा—तिष्ठ तावत् । पक्षपातमत्र देवी मन्यते । तदस्याः पण्डितपरिव्राजिकासहितायाः समक्षमेव न्याय्यो व्यवहारः । मौद्गल्य, अमुं प्रस्तावं निवेद्य परिव्राजिकया सार्धमाहूयतां देवी ।

[धारिणी परिव्राजिका च प्रविशतः]

धारिणी—भगवति, हरदत्तस्य गणदासस्य च संरम्भे कथं पश्यसि ।

परिव्राजिका—अलं स्वपक्षावसादशङ्कया । न परिहीयते प्रतिवादिनो गणदासः।

धारिणी—यद्यप्येवं राजपरिग्रहो हरदत्तस्य प्रधानत्वमुपहरति ।

परिव्राजिका—अयि राज्ञीशब्दभाजनमात्मानमपि चिन्तयतु भवती। पश्य।

अतिमात्रभासुरत्वं पुष्यति भानोः परिग्रहादनलः ।
अधिगच्छति महिमानं चन्द्रोऽपि निशापरिगृहीतः ॥ १ ॥

(*b*) State the two dissolutions of नेत्रकमलम् as a कर्मधारय and bring out their difference by examples. (4)

IV. (*a*) **Parse all the words of the line.**

नमस्कृत्य महेशाय मया ग्रन्थो विरच्यते.

(*b*) Name (1) a root that becomes transitive after a particular prefix (2) a root that gives different senses

in different पदs and (3) a root that changes its पद after a particular prefix.

(c) Distinguish between the senses of

सन्निधत्ते and संनिधत्ते (7)

V. (a) Render freely into Sanskrit:–

1 It does not matter if there are thousands of other kings; it is only in this prince that the earth has got a worthy ruler.

2 Slain, you will obtain heaven; victorious, you will enjoy the earth; therefore stand up, resolute to fight. (8)

(b) Translate into English:— (7)

वृद्धतापसपुरःप्रसारितं वेणुदण्डमवलम्ब्य शैशवे ।
भावयन्निव गदापरिग्रहं भाविनं पवनभूश्चचाल सः ॥ १ ॥
इतरतापशतानि निजेच्छया वितर तानि सहे चतुरानन ।
अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख ॥ २ ॥

VI. Translate into Sanskrit :—

In my former birth I was the son of a learned Brahmin and was well versed in Vedas. A prince proficient in the science of the bow was my friend and companion. As a result of constant association I became his equal even in his profession. We once happened to go a-hunting, in the course of which he killed many an animal in the forest. Tempted by his performances I let go an arrow myself, which ill-lucked as I was hit an innocent ascetic absorbed in meditation. Pierced through in his very vitals by my unfailing arrow and roused, of a sudden, from his still and sublime blissfulness, he lost control over his feelings and pronounced on me, a curse: " Be a hunter, heartless as you are, and take a low birth. " I was soon overcome, dropped on my knees, fell to his feet and poured over him my sorrow so that at length the soft-souled sage recovered tenderness and uttered, by way of relief, a blessing that even in my low birth I should be endowed with the knowledge of self.

Group XXVI.

I. **Translate into English:—** (22)

न ज्ञायते किं जीवितं श्रेयः, उताहो मरणम् । किमहं प्राणानुपलालयन् रोषपरुषस्य विधेर्निर्घृणप्रहारानप्रतीकारं सहेय, आहोस्विज्जीवितनिरपेक्षः पौरुषप्लवमासाद्य निरवधेर्दुःखोदधेः पारं जिगमिषेयम् ? । तिष्ठतु तावज्जीवितचिन्ता । अथ मरणं प्रतिपन्नं चेत्, तदपि न सुधियो भयाय, निद्राया अभिन्नत्वात् । दीर्घनिद्रा हि मृतिपर्यायेषु प्राज्ञैः पठितैव । अपि नाम, एवंविधेन महानिद्रापरपर्यायेण मरणेन भौतिकशरीरसुलभानि तानि तानि व्यलीकानि सुपरिहराणि भवेयुः । एतादृशीं परिणतिं को नाम नाभिनन्देत् ।

अथवा किमनयायतिगतया चिन्तया ? । मरणमेव सर्वथा मयाध्यवसेयम् । तत्साध्या निद्रा कस्य नाभिमता भवेत् ? । भवतु नामेयं संमता सर्वस्य । तथापि किं तत्र स्वप्नावकाशो न स्यात् ? । पार्थिवे पिण्डे परित्यक्तेऽपि चेतनाविरहसुलभं स्वापमनुभवतो नरस्य न जातु विश्रान्तिसुखपरिपन्थिनः स्वप्नाः प्रादुर्भवेयुः, इत्यत्र कः प्रत्ययः ? । इदमेव स्वप्ननिबन्धनं भयं नाद्यापि मनुजहृदयं जहाति । अन्यथा कृपाणिकाप्रहारमात्रनिर्वर्तनीयेन मरणेन, को नामापरिमेयेभ्यः संसारदुःखेभ्यः सपद्येव मोचयित्वात्मानं न गतव्यथं कुर्यात् ? ।

II. (*a*) Analyes and name the following compounds:— (6)

धृष्टद्युम्नः, निर्विषः, पश्यतोहरः, पुण्यश्लोकः, हर्षनिर्भरः.

(*b*) Give Sanskrit compounds for the following:—Having a tail, not minding the consequences, free from danger the three worlds taken together, a tree meant for shade. (5

III. (*a*) Give (1) Nom. Sing. and Plu. of कति, प्रथम *m*., अनर्वन् and श्रेयसी. (*a*) Instru. Sing. and Plu. of अप्, कोसल (a particular province), मघवत् and वासस्. (6)

(*b*) Give (1) Pres. 1st Per. Sing. and Plu. of वश्, क्लृप्, विद् *cl. 2* and छिद् (2) Perf. and Cond. 3rd Per. Sing. of वस्, इ with अधि, ईह् and गुप् *cl. 1* (3) Past Pass. Parti. of दिव्, वम्, दा and ह्वे. (4) the Absolutives of दृश्, वद्, दम् and वह्. (8)

IV. (*a*) Translate into English:-- (19)

१ रत्नैर्महार्हैस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमन्ति धीराः ॥ १ ॥

२ इतरेषु विहंगेषु हन्त स्वच्छन्दचारिषु ।
शुक पञ्जरबन्धस्ते मधुराणां गिरां फलम् ॥ २ ॥

(*b*) Render freely into Sanskrit:-- (7)

1 Since you despise me, you shall be childless, as long as you do not propitiate my progeny.

2 Whatever being there is glorious, beautiful or mighty, understand that to have sprung from a part of my splendour.

V. (*a*) Name three roots that become transitive, being preceded by अधि. (3)

(*b*) State and illustrate the general rule for the addition of क at the end of a बहुव्रीहि compound. (5)

(*c*) Name fully the forms underlined in the following:--
शिशिरवसन्तौ पुनरायातः, प्रतिकूलतामुपगते हि विधौ, स हि विघ्नानपोहति, अविघ्नमस्तु ते, सरसा शुष्कम्, कृष्णमेघास्तिरोदधे (6)

VI. Translate into Sanskrit:--

Alone in the vast forests peopled by wild beasts and infested by thieves and म्लेच्छ tribes, poor bewildered दमयन्ती wandered about in quest of नल, asking in her trouble the fierce tiger and the silent mountain to tell her where her lord had gone. After wandering about for three days and three nights, the unfortunate queen came to the delightful asylum of some ascetics, and entering it fearlessly but with great humility, she was welcomed by the holy men, who, struck by her beauty, enquired whether she was the presiding deity of the forest, the mountain or the river. दमयन्ती explained her situation and received from the ascetics most comforting assurances of early re-union with नल and a great future happiness. (22)

Group XXVII.

I. (*a*) Translate into English:— (17)

स प्रविश्य तु तद्वेश्म रावणो राक्षसाधिपः ।
अपश्यद्राक्षसीमध्ये सीतां दुःखपरायणाम् ॥ १ ॥

मृगयूथपरिभ्रष्टां मृगीमिव शुनीवृताम् ।
अधोगतमुखीं सीतां तामभ्येत्य निशाचरः ।
उवाच वाक्यं पापात्मा सीतानुनयकाङ्क्षया ॥ २ ॥

यदिदं राज्यतन्त्रं मे त्वयि सर्वं प्रतिष्ठितम् ।
जीवितं च विशालाक्षि त्वं मे प्राणैर्गरीयसी ॥ ३ ॥

परिक्षिप्ता समुद्रेण लङ्केयं शतयोजना ।
नेयं धर्षयितुं शक्या सेन्द्रैरपि सुरासुरैः ।
नाहं पश्यामि लोकेषु यो मे वीर्यसमो भवेत् ॥ ४ ॥

राज्यभ्रष्टेन दीनेन तापसेन पदातिना ।
किं करिष्यसि रामेण मानुषेणाल्पतेजसा ॥ ५ ॥

दर्शने मा कृथा बुद्धिं राघवस्य वरानने ।
कास्य शक्तिरिहागन्तुमपि सीते मनोरथैः ॥ ६ ॥

त्रयाणामपि लोकानां न तं पश्यामि शोभने ।
विक्रमेण नयेद्यस्त्वां मद्बाहुपरिपालिताम् ॥ ७ ॥

(*b*) Compress into single words (simple or compound) the phrases:- (4)

धर्षयितुं शक्या, त्रयाणां लोकानाम्, राघवस्य दर्शने बुद्धिम्.

II. (1) Give:—

(*a*) Nom. Sing. and Plu. of:—

एकतर *n*., विश्व *m*., अनुष्टुभ् and **एकपत्नी**

(*b*) Abl. Plu. and Gen. Sing. of **उत्तर** (a reply), **किम्** *f.*, **दिव्** and **मेधाविन्** *n.* (7)

(2) (*a*) Give Loc. Sing. of the fem. of:—

पुण्यनामन्, महात्मन्, and **मत्स्य.**

(*b*) Distinguish between the senses of the compound **पूर्वकाय:** dissolved as **पूर्वं कायस्य** and as **पूर्व: काय:**. (9)

III. (*a*) Translate into English:— (15)

विभीषण:—सर्वथा महाराजस्य विप्रतिपत्त्या राक्षसकुलस्य नाशोऽभ्युपगत इति मन्ये ।

रावण:—का मे विप्रतिपत्ति: ?

विभीषण:—ननु सीतापहरणमेव ।

रावण:—सीतापहरणेन को दोष: स्यात् ?

विभीषण:—अधर्मश्च ... ... ।

रावण:—चशब्देन सावशेषमिव ते वचनम् । तद् ब्रूहि । मम खलु प्राणै: शापित: स्या: यदि न कथये: ।

विभीषण:—बलवद्विग्रहश्च ।

रावण: कथं कथं बलवद्विग्रहो नाम

शत्रुपक्षमुपाश्रित्य मामयं राक्षसाधिप: ।
क्रोधमाहारयंस्तीव्रममीरुरभिभाषते ॥ १ ॥

ममानवेक्ष्य सौभ्रात्रं शत्रुपक्षमुपाश्रितम् ।
नोत्सहे पुरतो द्रष्टुं शीघ्रमेष निरस्यताम् ॥ ३ ॥

विभीषण:—प्रसीदतु महाराज: । अहमेव यास्यामि ।

अद्यैव तं कमललोचनमुग्रचापं
रामं हि रावणवधाय कृतप्रतिज्ञम् ।
संश्रित्य संश्रितहितं प्रथितं नृदेवं
नष्टं निशाचरकुलं पुनरुद्धरिष्ये ॥ ३ ॥

(*b*) I Show the difference in the senses of the following:—

(*a*) स श्लोकपञ्चकं निशामधीते
(*b*) स श्लोकपञ्चकं निशायामधीते
and (*c*) स श्लोकपञ्चकं निशयाधीते

Write a note on the word **प्राणै:** in **प्राणैर्गरीयसी** (Q. I.) (2)

(c) Analyse and name the compounds contained in the three stanzas of the above passage. (7)

IV. (a) Translate into English:—

(१) विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ॥ १ ॥

(२) एकस्य मूल्येन व्ययः शुध्यति

(३) अप्रियस्यापि वचसः परिणामेऽविरोधिनः ।
वक्ता श्रोता च यत्रास्ति रमन्ते तत्र देवताः ॥ १ ॥

(b) Render freely into Sanskrit:— (6)

1 To err is human, to forgive is divine.
2 Age considers, youth ventures.
3 None are so deaf as those that would not hear. (4)

(c) Give (1) Pres. 3rd Per. Plu. of सू A., व्यथ्, गुप् *cl. 1* and इ with अधि A. (2) Pass. 3rd Per. Sing. of the Perf. and of the Aorist of ग्रह्, भिद्, द्युत् and ह्वे. (3) Past Pass. Parti. of सृज्, गुप्, मुष् and वृत and (4) the Absolutives of यम्, तॄ, मुद् and सह्. (10)

V. Translate into Sanskrit:— (16)

Two travellers, seeing before them a great forest, promised to help each other if they should meet with any danger. They had not gone far when a tiger came rushing towards them out of a thicket; upon which one, being a light nimble fellow, got up into a tree; the other falling flat upon his face and holding his breath, lay still while the tiger came up and smelled at him. But that creature, supposing him to be a dead carcass, went back again into the wood, without doing him the least injury. Then he who had climbed the tree came down to his companion, and with a pleasant smile asked him what the tiger said to him. "For" said he, "I saw him put his mouth very close to your ear." "He told me," said the other, "to take care for the future not to put any confidence in such cowards as you."

Group XXVIII.

I. Translate into English:—

(*a*) **धृतराष्ट्रः**—वत्स संजय, कुरुकुलकाननैकशेषप्रवालो मे वत्सो दुर्योधनः कच्चिज्जीवति ?

गान्धारी:—जात, यदि सत्यं जीवति वत्सः, तत्कस्मिन्नुद्देशे कथय ।

संजयः—नन्वेष महाराज एक एव न्यग्रोधच्छायायामुपविष्टस्तिष्ठति ।

गान्धारी:—जात, एकाकीति भणसि । किं नु खलु संप्रति भ्रातृशतं तस्य पार्श्वे नास्ति ?

(दुर्योधनमासाद्य सर्वे रथादवतरन्ति)

गान्धारी:—वत्स, अतिगाढप्रहारवेदनाकुलस्य अस्मास्वपि ते न प्रसरति वाणी ?

धृतराष्ट्रः—वत्स, किमकृतपूर्वः संप्रति मय्यप्ययमनव्याहारः ?

दुर्योधनः – पापोऽहमप्रतिकृतानुजनानदर्शी

तातस्य बाष्पपयसां तव चाम्ब हेतुः ।

दुर्जातमत्र विमले भरतान्वयेऽपि

किं मां सुतक्षयकरं सुत इत्यवैषि ? ॥ १ ॥ (15)

(*b*) १ प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।

स पिता पितरस्तासां केवलं जन्महेतवः ॥ १ ॥

२ विधाय वैरं सामर्षे नरोऽरौ य उदासते ।

प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम् ॥ १ ॥ (6)

II. Dissolve and designate the compounds occurring in the three stanzas of Q. I. (11)

III. (*a*) Give (1) Pres. 3rd Per. Sing. and Plu. of इन्ध्, ज्ञा, आप् and शास् (Act. and Pass.) (2) Perf. 3rd Per. Sing. of अज्ज्, स्मि, क्रीड् and भ्रस्ज्. (3) Past. Pass. Parti. of गम्, बन्ध्, लू and श्वि. (4) the Absolutives of आ + हन्, वि + गण्, नि + खन् and प्रच्छ्. (10)

(*b*) Decline (1) आशिस्, देव, प्रेमन् and चतुर in the Nom. Sing. and Loc. Plur. (2) श्वन्, अश्वयुज् Adj., प्रसू and यातृ in the Nom. Plu. and Gen. Sing. (9)

IV. (*a*) Translate into English:—

मुधैव जनाः प्रज्ञापाण्डित्ये निसर्गैकसंस्थे वदन्ति । ते हि सामानाधिकरण्यं भूयो व्यभिचरतः । पाण्डित्यं नाम प्रायः परतोऽधिगतो ज्ञानराशिः : प्रज्ञा च स्वतोऽर्थसंदर्शनसमुत्थमात्मनः प्रतिपत्तिपाटवम् । ज्ञानं यावत्स्वप्रतीतिपूर्वं धारयितुर्नात्मीयतामेति तावत्तस्य पण्डितपदवीं निर्वाहयदपि केवलं भार एव । अहो प्रभूतं ते ज्ञानमिति मतिः पण्डितस्य गर्वमादधाति । 'कियानपि ज्ञाननिधिर्नाद्यापि मयात्मसात्कृतः' इति खेदः प्राज्ञस्य विनयं वर्धयति । निपुणमतिभिर्निर्मिता ग्रन्थाः शम्बरचातुरीसमुत्था इव विवेकविकलाञ्जनान् हर्षपरवशान् कुर्वन्ति । तथा हि । केचित् प्रणेतुराहितलक्षणत्वप्रत्ययादपरीक्ष्यैव ग्रन्थान् वरेण्यान् गणयन्ति । केचिदर्थवैचित्र्यवाश्रिताः शब्दसौष्ठवप्रीताश्च अर्थदोषसंकुलानपि प्रबन्धान् गुणैरनर्हान् मन्यन्ते । अपरे पुनरालस्योपहता विमर्शनक्लेशविमुखाः सदसतो ग्रन्थानविशेषमेव सेवन्ते ।

(*b*) Translate freely into Sanskrit:— (6)

1 It is possible for you to pacify his anger by giving him crores of cows.

2 Better is one's own duty, though destitute of merits than the well-executed duty of another ; he who does the duty imposed by his birth does not incur sin.

V. What do you understand by नित्यसमास and सापेक्षसमास ? Give two examples of each. (6)

VI. Translate into Sanskrit:— (22)

As though to make the lesson more impressive it was given on a field of battle अर्जुन, the warrior prince, was to vindicate his brother's title and to destroy a usurper. It was his duty as prince, as warrior, to fight for the acquisition of his brother's heritage. To make the contest more bitter, loved comrades and friends stood on both sides, wringing his heart with personal anguish and producing a conflict of duties as well as physical strife. Could he slay those whom he owed love and duty, and trample on ties of kindred ? To break family ties was a sin ; to leave his brother's lawful subjects

in the bondage of another was a sin. Where was the right way? Justice must be done; else law would be disregarded, but how slay without sin? The answer is the burden of the book. Have no personal interest in the event; carry out the duty imposed by the position in life.

Group XXIX.

1. (*a*) Translate into Sanskrit:— (18)

वासुदेवः—(सभागतं दुर्योधनं प्रति)–भोः कौरवेश्वर, भवतो राज्ये शरीरे च कुशलमनामयं च पृष्ट्वा विज्ञापयन्ति युधिष्ठिरादयः पाण्डवाः—

अनुभूतं महद्दुःखं संपूर्णः समयः स च ।
अस्माकमपि धर्म्यं यद्दायाद्यं तद्विभज्यताम् ॥ १ ॥

दुर्योधनः—भोः केशव, न जानाति भवान् राज्यव्यवहारम् ।

राज्यं नाम नृपात्मजैः सहृदयैर्जित्वा रिपून् भुज्यते
तल्लोके न तु याच्यते न तु पुनर्दीनाय वा दीयते ।
काङ्क्षा चेन्नृपतित्वमाप्तुमचिरात् कुर्वन्तु ते साहसं
स्वैरं वा प्रविशन्तु शान्तमतिभिर्जुष्टं शमायाश्रमम् ॥ २ ॥

वासुदेवः—भोः सुयोधन, अलं बन्धुजने परुषमभिधाय । ननु विदित एव ते विजयपराक्रमः । शृणु—

कैरातं वपुरास्थितः पशुपतिर्युद्धेन संतोषितो
वह्नेः खाण्डवमश्नतः सुमहती वृष्टिः शरैर्वारिता ।
देवेन्द्रारिनिकराः करालदनुजा नीताः क्षयं लीलया
नन्वेकेन तदा विराटनगरे भीष्मादयो निर्जिताः ॥ ३ ॥

बद्ध्वा त्वं चित्रसेनेन नीयमानो नभस्तलम् ।
विक्रोशन् घोषयात्रायां फाल्गुनेनैव मोक्षितः ॥ ४ ॥

किं बहुना ।

दातुमर्हसि मद्वाक्याद्राज्यार्धं धृतराष्ट्रज ।
अन्यथा सागरान्तां गां हरिष्यन्ति हि पाण्डवाः ॥ ५ ॥

(*b*) Translate freely into Sanskrit:— (6)

1 I hope that the villainous दुर्योधन has been traced out. Is it so ?

2 Giving up all duties, come to me alone for shelter; sorrow not, I will liberate you from all sins.

II. (1) Give (*a*) Nom. Plu. and Dative Sing. of युष्मद्, त्रितय *m.*, दक्षिण (clever), जाग्रत् *n.* & (*b*) Gen. and Loc. Plu. of वर्षा, ज्योतिस्, अत्रभवत्, प्रगल्भ *m.* (2) Give (*a*) Pres. 3rd Per. Sing. and 1st Per. Plu. of स्वप्, चि, क्लिश् P., and प्रच्छ्. (*b*) Perf. and Aorist 3rd Per. Sing. Passive of धा, तड्, खन् and व्यध् . (*c*) Past Pass. Parti. of कुष्, ग्रह्, हा and सो. (*d*) Perf. Parti. of गम्, इ, श्रु and तॄ. (19)

III. Translate into English:—

(*a*) ननु मानव, दुस्तरमिमं संसारार्णवमुल्लङ्घ्य ध्रुव स्थानं प्रपित्सेसि चेत्, मोघान् क्षणध्वंसिनोऽमूनैहिकानर्थान् संत्यज । ते हि न किमपि ते श्रेय आवहेयुः, प्रत्युत भौमसुखाभिलाषमेव द्रढयेयुः । कोऽर्थस्ते तैरनुसृतैः ? अतस्तान् विहाय मामकमनुसर । हे संसारसंसरणरसिक, शमप्राप्तये श्रमपरिगतस्यापि ते नात्र कलहादन्यद्भागधेयम् । सांसारिकं किमपि वस्तु नान्तरात्मनस्तोषाय, इति ध्रुवमवेहि । मा संपदं कामयस्व । मा वा यशसे स्पृहय । संपन्नाम नयनकमनीयापि तत्त्वतो मृद्धा न भिद्यते । यशोऽपि श्रवणैकग्राह्यो वातवीचिविकारविशेषः, यो न स्पर्शसह्यः, न वा दर्शनगोचरः, नापि रसनासंवेद्यः। एताभ्यां वसुयशोभ्यां न किमपि कल्याणमपेक्षितुमर्हसि । अतस्ते परित्यज्य मामनुयाहि । भो मोक्षमार्गपथिक, प्रमादमूला ते स्वर्गतश्च्युतिः । अतो धर्मविहितचेता नरकवर्त्मनो निवर्तस्व । परमात्मानं शरणमुपेहि, येन स तव पातकानि क्षमेत । भ्रातः, पथोऽस्मात् परावृत्तो भव । नायं स्वर्गमुपतिष्ठते । दिव्याभिः स्तुतिगीतिभिरीश्वरं प्रसादय । एवं कृतेऽत्रैव कृतार्थो भवितासि । जडवस्तुतो निवृत्ततर्षो मदीयं पन्थानं प्रतिपद्यस्व । (24)

(*b*) 1 यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ॥ १ ॥

2 अधमा धनमिच्छन्ति धनमानौ च मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥ २ ॥ (5)

IV. (*a*) Dissolve and name the compounds in stanza 2, from Q. I.

(*b*) Give compounds for:—

१ कैलासं वपुरास्थितः, २ महद्दुःखम्, ३ सवितुः पादैः स्पृष्टः.

(*c*) Re-write, by changing the voice, राज्यं नृपात्मजैः रिपून् जित्वा भुज्यते.

(*d*) Transform the sentence राज्यार्धं दातुमर्हसि by using a verb from the root युज् in place of अर्हसि.

(*e*) Complete the sentence किं बहुना ? by supplying the part left understood.

(*f*) Transform मानो महतां धनम् so as to contain मान in the instru. (15)

V. Translate into Sanskrit:—

The lion was dead and all the animals flocked to his den to mourn with the lioness, his widow, who was making the mountains and the forest resound with her roars. Having paid their respects to her, they went on to elect a king, the crown of the deceased lion being set forth in the midst of the assembly. The lion's cub was too young and too weak to take the royal sway over so many high-spirited animals. " Give me time to grow " said he " I shall know well how to reign and to make myself feared as my fater did before me. In the mean-time I will study the history of the great deeds of my father to the end that I may one day equal him in glory."

Group XXX.

I. Translate into English:— (18)

(*a*) (उत्सृष्टजडदेहः शुकः स्वगतं भाषते)

अपि नाम स समयः प्रत्यावर्तेत यदाहं वायुरिवानिरुद्धं समचरम्, स्वच्छन्द-वनजातानि ललितरसास्वादानि फलान्यास्वादयम्, प्रसन्नमधुरं प्रस्रवणाम्भः पर्याप्तमपिबम्, यथाभिलषितायां शाखिशाखायामुपाविशं च । एवं तेषु तेषु व्यापारेषु

स्वायत्तवृत्तेर्मम किमाकारस्य रुचिरतां स्मरामि, उत पिच्छपुञ्जस्य भासुरतां चिन्तयामि, आहोस्विदालापानां नवनवत्वमनुध्याय शोचामि । मम भाग्यविप्लवात् मे मनोहररूपत्वं, मधुरस्वरत्वं, समुज्ज्वलबर्हत्वं वा नैकमपि मां रक्षितुमलमासीत् । सर्वमेव सपदि वन्ध्यतामयासीत् । अहं हि केनापि क्रूराशयेन पुरुषेण गृहीतः पञ्जरे निरुद्धश्च । तत्र आहारविरहात् कृशीभूतस्य कृच्छ्रेण श्वसतश्च मेऽल्पावशेषं जीवितमचिरेण द्वारशलाकान्तरेणापक्रान्तम् ॥ (12)

(*b*) १ सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृष्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥ १ ॥

२ जीयन्तां दुर्जया देहे रिपवश्चक्षुरादयः ।
जितेषु ननु लोकोऽयं तेषु कृत्स्नस्त्वया जितः ॥ १ ॥ (6)

II. (*a*) Analyse and name the following compounds:—

सप्तपर्णः (वृक्षः), चतुरश्रम्, त्र्यवराः (साक्षिगः), पारेश्मशानम्, and बहुव्रीहिः (5)

(*b*) Join in बहुव्रीहि compounds, to qualify a masculine noun, the following:—

समान + धर्म, भग्न + धनुस्, विस्तीर्ण + पथिन्, लब्ध + मही, and बहु + नेतृ.

III. (*a*) (1) Give the feminines of तुदत्, युवन्, शूद्र, भव, and क्रोष्टु.

(2) Decline मथिन्, द्यो, गिर्, and दक्षिण *m*. (=southern) in the ablative singular and locative plural. (6)

(*a*) Give: –

(1) the second person singular, present, of स्तृ, सद्, कृ, and कृत्.

(2) the third person singular, perfect and simple future of गाह्, नृत्, सृज्, and चि.

(3) the past participles of क्षण्, स्वप्, ज्ञा, and स्वञ्ज्.

and (4) the third person singular, present, of the causal of क्री, रुह्, अधि + इ, and स्ना. (10)

IV. (*a*) Re-write the sentence:—

उत्तीर्णयमुने वीरसेने शत्रुयोधाः प्रकम्पिताः--
minding the following directions in order:—

1 Change the sentence into a complex one.
2 Have यमुना as the subject of the locative absolute.
3 Use उत्तीर्ण as an adj to वीरसेन.

(*b*) State and illustrate the difference of sense between आह्वयति and आह्वयते.

(*c*) Distinguish between the uses of किं and कच्चित् as interrogatives.

(*d*) Render into Sanskrit, by using धारयति for the verb, the following sentence:—

Perseverance is sure to reward the author with success. (12)

Translate into English:— (18)

कंसराजः—श्रुत्वा व्रजे विपुलविक्रमवीर्यसत्त्वं
दामोदरं सह बलेन समाचरन्तम् ।
आदिश्य कार्मुकमहं तमिहोपनीय
मल्लेन रङ्गगतमद्य तु घातयामि ॥ १ ॥

ध्रुवसेनः—श्रोतुमर्हति महाराजः । प्रविशन्नेव दामोदरः ससंकर्षणो गोपजनपरिवृतो रजकेभ्यो वस्त्राण्याच्छिद्य गृहीतवानिति श्रुत्वा महामात्रेणोत्पलापीडो नाम गन्धहस्ती संचोदितस्तमभिघातयितुम् । ततः
तमापतन्तं सहसा समीक्ष्य
समेतगोपालकवृन्दमध्ये ।
बालो बलेनाद्रिनिभं गजेन्द्रं
दन्तं समाकृष्य जघान शीघ्रम् ॥ २ ॥

कंसराजः—कथं जघानेति ? गच्छ भूयो ज्ञायतां वृत्तान्तः ।

ध्रुवसेनः—यदाज्ञापयति महाराजः । (निष्क्रम्य पुनः प्रविश्य) धनुःशालारक्षकेण सिंहबलेन वार्यमाणस्तं कर्णमूले प्रहृत्य हत्वा, धनुः समादाय द्विखण्डं कृत्वा, सांप्रतं रङ्गभूमिमवतीर्णो वासुदेवः । (नेपथ्ये

महान्नादः) महाराज, एष कृष्णोऽग्रजन्मानं भाषते । श्रूयताम् ।

(नेपथ्ये) —

आर्य— मर्त्येषु जन्म विफलं मम तानि घोषे
कर्माणि चात्र नगरे धृतये न तावत् ।
यावन्न कंसहतकं युधि पातयित्वा
जन्मान्तरासुरमहं परिकर्षयामि ॥ ३ ॥

VI. (*a*) Render freely into Sanskrit:—

1 We owe to you our success in difficult undertakings.

2 If the splendour of a thousand suns were to blaze out together in the sky, that might resemble the lustre of the glorious one. (6)

(*b*) Translate into Sanskrit:—

The fisherman was willing to bestow his daughter on the king, but only on condition that the son born of her should occupy the throne to the exclusion of all others. This was a difficulty that staggered the king, for he could not find it in his heart to set aside **देवव्रत**, the glorious son of **गङ्गा**. The matter accordingly dropped, but his disappointment was very great, and he could not conceal from the world that there was something preying upon his mind. **देवव्रत**, being much concerned about his father's happiness, found out the cause of it and going to the father of the sweet-scented maiden **सत्यवती**, he formally renounced his own right to the succession, and recorded a vow of perpetual celibacy. (20)

Group XXXI.

I. Translate into English:—

वत्स रतीश, किमद्यापि चिरयसि ? अहो ते व्यामोहः । यदधुनापि न त्वं नावमारूढः । संप्रति हि समीरणस्तव प्रयाणानुकूलो वर्तते । सार्थिकाश्च सर्वे त्वां प्रतिपालयन्ति । आशीर्वचनपुरःसरं मया वितीर्यमाणानीमान्यनुशासनानि सदैव चेतसा धारय ।

यस्य कस्याप्यग्रे मनोगतं मा प्रकटीकुरु। असम्यगालोचितेषु कार्येषु मा प्रवर्तस्व। वयस्यैः सार्धमनियन्त्रणनिर्भरं व्याहरन्नपि ग्राम्यवचनरुचिर्मा भूः। यानि कान्यपि मित्राणि दृढपरीक्षणपूर्वं त्वया संपादितानि भवेयुः, तान्यत्यायसैः स्नेहपाशैर्गाढनिगडितानि कृत्वात्मानिर्विशेषतां नय। एवं कृत्यपि नवं नवमनिरूपितस्नेहसद्भावं नरं सुहृत्त्वेनाभिनन्दितुं मा त्वरस्व। कलहस्थानारम्भस्तावत्प्रथमं बुद्धिलक्षणम्। इदमप्यपरं यत्सकृत्प्रस्तुतः कलहस्तथा स्थैर्येणानुबन्द्धव्यः यथा प्रतिपक्षस्त्वामपकर्तुं न धृष्णुयात्। बालादपि सुभाषितं ग्राह्यं, किं पुनर्वर्षीयसः? स्वाभिप्रायस्तु सहसा न प्रकाशनीयः। सर्वस्यापि वचः श्रोतव्यम्। आत्मनो निर्णयस्तु न स्फुटीकार्यः। आयसदृशान्यपि ते वासांसि महार्हाणि भवेयुः, न पुनः स्वैरविरचितानि, न वा शोभामात्रप्रयोजनानि। उक्तं हि— 'वासो धनं गमयति वासमा शीलमुच्यते'। न त्वया वयस्यव्यवहारे उत्तमर्णेनाधमर्णेन वा भवितव्यम्। मित्राय दत्तं चेत्, धनं स्वयं नश्यत्, मित्रमप्यमित्रतां नीत्वा, तदपि नाशयति नाम। अथ मित्रादात्तं, तत्क्रमेण नरं व्ययविषये शिथिलावधानं जनयति। इदं त्वं सविशेषमवधारयेः – मनःपूतं समाचरसि चेत्, परवञ्चनायां न ते प्रवृत्तिरुपजायेत।

शुभास्ते पन्थानः सन्तु। एतत्पितृभाषितं स्वल्पं मधुरमपि प्रास्थानिकयाशिषा सङ्गतत्वान्मनसस्ते व्रजतु मधुरतरताम्।

II. Give (*a*) The Genitive and Locative singular of **अदस्** *m.* **देवेज्**, **अध्यूषिवस्**, *m.* and **द्युम्न**.

(*b*) The Accusative singular and Genitive plural of **अन्यतर** *n.*, **तव्** *f.*, **स्वयंभू** and **त्रिद्विष्**.

(*c*) The second and third person, plural, Present of **गुह्**, **दिह्**, **सू** and **भुज्**.

(*d*) The third person singular, Passive, of the Perfect and Periphrastic Future of **दृश्**, **लिह्**, **गण्**, and **वद्**.

(*e*) The past participles of **अञ्ज्**, **रुद्**, **रुह्**, and **विद्** *cl.* 6.

(*f*) The Absolutives of **नम्**, **दिव्**, **मुह्** and **गुप्** *cl.* 1. (18)

III. (*a*) Render freely into Sanskrit:—

1 That king had no prisoner whom he could release at the festival of the birth of his son.

2 The more diligently you study, the fewer will be your chances of failure.

(*b*) Translate into English:— (8)

यज्जीव्यते क्षणमपि प्रथितं मनुष्यै-
विज्ञानविक्रमयशोभिरहीयमानम् ।
तन्नाम जीवितमिह प्रवदन्ति सन्तः
काकोऽपि जीवति चिराय बलिं च भुङ्क्ते ॥ १ ॥

२ परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥
नात्यन्तं सरलैर्भाव्यं गत्वा पश्य वनस्थलीम् ।
छिद्यन्ते सरलास्तत्र कुब्जास्तिष्ठन्ति पादपाः ॥ १ ॥ (11)

IV. (*a*) Explain and name the Compounds in Q. III. b. (10)

(*b*) Re-write the following by changing the voice:—

ग्रामीणान्मार्गशाखिनां नामधेयानि पप्रच्छतुः । (

V. Translate into Sanskrit:—

Ashvatthâmâ decided to attack the sleeping host of the sons of Pandu, and despite the efforts of Kṛipa to dissuade him, he went to the entrance of their camp. Entering it at dead of night, he slaughtered his sleeping enemies, Dhṛishtadyumna first of all, with the sons of Draupadî. Returning to the dying Duryodhana, with Kṛipa and Kṛitavarman, he told him of the destruction of his foes. The agonising king was supremely satisfied and with the words: " Good be to you all ! Prosperity be yours ! All of us will again meet in heaven, " he quietly breathed his last. Yudhishthira, on hearing the grievous news, sent for Draupadî, who, broken-hearted, took a vow to die if Ashwatthâmâ were not slain, and the gem on his head, born with him, were not brought to her. (20)

Group XXXII.

I. (*a*) Translate into English:—

प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवानृषिः ।
चकार चरितं कृत्स्नं विचित्रपदमर्थवत् ॥ १ ॥
चिन्तयामास को न्वेतत्प्रयुञ्जीतेति स प्रभुः ।
तस्य चिन्तयमानस्य महर्षेर्भावितात्मनः ।
अगृह्णीतां तदा पादौ मुनिवेषौ कुशीलवौ ॥ २ ॥
स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ ।
वेदोपबृंहणार्थाय तावग्राहयतादरात् ॥ ३ ॥
काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत् ।
पौलस्त्यवधमित्येव यच्चकार स नामतः ॥ ४ ॥
ऋषीणां च द्विजातीनां साधूनां च समागमे ।
यथोपदेशं तत्त्वज्ञौ जगतुः सुसमाहितौ ॥ ५ ॥
तच्छ्रुत्वा मुनयः सर्वे बाष्पपर्याकुलेक्षणाः ।
साधु साध्विति तावूचुः परं विस्मयमागताः ।
चिरनिर्वृत्तमप्येतत्प्रत्यक्षमिव दर्शितम् ॥ ६ ॥ (15)

(*b*) Write notes on कुशीलवौ, तावग्राहयत्, पौलस्त्यवधम् and प्रत्यक्षम्.

(*c*) Dissolve and name the following compounds:— (4)
प्राप्तराज्यस्य, भावितात्मा, वेदोपबृंहणार्थाय, यथोपदेशं and द्विजातयः

II. (1) Decline (*a*) कतिपय *m.*, अष्टन्, वपुस्, and पुण्यनामन् *f.* in the Locative Sing. and Plural.

(*b*) वर्षाभू (a female frog), समिध्, feminine of गुरु, and सुगन्धि adj. in the dative sing. and plural. (7)

(2) Give (*a*) the first Person, Sing. and Plural, Imperfect of जॄ, कॄ, नह् and विद् (7th Conj.)

(*b*) the singular of the third Person of the Perfect of हृ, कथ्, कास्, and नह्.

(*c*) the past participles of **जागृ, भुज्, व्यध्** and **पच्.**

(*d*) the potential participles ending in **य** of **युज्, दृश्, कृ** and **इ** with **अधि.**

III. Translate into English:—

अकिंचनस्यापि मे मानसमेव साम्राज्यसुखमावहति । क्वान्तर्मानसं वर्तमान आनन्दः, क्व च जनाधीनं धनसाधनं वा भौमं सुखजातम् ? अन्यान्समृद्धिसुखभाजोऽपि वीक्षमाणस्य न मे द्रव्याभिलाषो जायते । परितोष एव मे जीवनम् । वृत्तिमात्राधिकं नाहं कामये । श्रीमद्भ्योऽवधीरणादुःखं च नानुभवामि । शमरतं मे मनः, इष्टवस्तुविरहं न गणयति, नापि संतोषावष्टम्भादर्थाभावेन विषादं कलयति । अविषण्णश्चाहं राजवन्नन्दामि । कथमृद्धिमन्तो जनाः सुखानि भोगादेव नाशं प्रयान्ति, कथं वा उच्चैःपदलङ्घनलोलचेतसः पतनमनुभवन्ति, इत्येतन्मे प्रत्यहं प्रत्यक्षमेव । 'गतिः सोच्छ्रायाणां पतनमनुकूलं कलयति'—इत्यपि मे नया दृष्टिपथमवतरति । अहो तेषां क्लेशगरिमा, ये श्राम्यन्ति, द्रव्यमर्जयन्ति, कृच्छ्रेण वितरन्ति च । ईदृशं चिन्ताभारं सोढुं न कदापि मे मनः प्रवर्तेत । अहं परस्योत्कर्षापकर्षौ सममेव पश्यामि । सांसारिका भावाः परानभिभवन्तु नाम, अहं पुनस्तैरविकृतश्चरामि । नाहं द्विषतो बिभेमि, न वा सुहृदमवधारयामि । न मे निधनाद्भीतिः, न वा प्रलयतो भयम् । आढ्यानामपि केषांचिद्बलीयान्धनगर्ध आलोक्यते । अल्पपरिच्छदस्यापि मे नाभ्यधिकस्पृहा । येन सत्यामपि प्रभूतायां संपदि ते दरिद्राः, विरलेऽपि धनेऽहं श्रीमान् । ते वराकाः, अहमीश्वरः । ते याचकाः, अहं दाता । तेऽर्थिनः, अहमर्थवर्षी । ते ग्लायन्ति, अहं निर्वृणोमि । नाहं किमप्यभिलषामि, यदृच्छालब्धेन च वृत्तिं कल्पयामि । भूयसे धनाय नाहमित इतो धावामि । मितमेव धनं मे तृप्तये । न विभवो मे क्षोभाय । सर्वतोऽपि प्रवृत्ते चक्रपातेऽहं निराकुल एव जलधिकूल उपविशामि । नश्वरस्यार्थस्य कृते च उद्यच्छमानाञ्जनान्दृष्ट्वान्तर्हसामि । इत्थमहं स्वच्छन्दचारी । किमिति मयात्मा क्लेशे पातयितव्यः ? यस्मात्—'संतोष एव पुरुषस्य परं निधानम्' इति मे निश्चिता मतिः ॥ (30)

IV. (*a*) Distinguish between the senses of **वेदमधीयन्** and **वेदमधीयानः**.

(*b*) State and illustrate the occasions for the change of **महत्** into '**महा**' as the member of a compound.

(*c*) Render into Sanskrit the sentence—

"You do not deserve to leave me (a female)"
by using severally as the predicate अर्हसि, अर्हामि, युज्यते, युक्त (adj). and युक्तम्. (8)

V. (*a*) Translate into Sanskrit:—

Next day, the hunter brought fruits and water; and when I did not touch them, he said tenderly: " It is unnatural for men to refuse food when hungry. You, mindful of a former birth, should not make distinction of what may and may not be eaten. There is no sin in acting in accordance with the state to which your past deeds have brought you. It is lawful in a time of distress to eat food not proper for one, in order to preserve life. You need not fear the food as coming from our caste, for fruit may be accepted even from us. " I, wondering at his wisdom, partook of food, but kept silence. (13)

(*b*) 1 Few things are impossible to diligence and skill.

2 Suspicion is the poison of friendship.

3 Rest is won only by work.

4 A word to a wise man is enough.

Group XXXIII.

I. (*a*) Translate into English:—

प्राह राजानमासाद्य युद्धं देहीति रावणः ।
निर्जितोऽस्मीति वा ब्रूहि त्वमेवं मम शासनम् ॥ १ ॥

राजानरण्यस्तच्छ्रुत्वा राक्षसेन्द्रमथाब्रवीत् ।
दीयते द्वन्द्वयुद्धं ते राक्षसाधिपते मया ॥ २ ॥

ततः शक्रधनुःप्रख्यं धनुर्विस्फारयन्स्वयम् ।
आससाद नरेन्द्रस्तं रावणं क्रोधमूर्च्छितः ॥ ३ ॥

तस्य बाणाः पतन्तस्ते चक्रिरे न क्षतं क्वचित् ।
वारिधारा इवाभ्रेभ्यः पतन्त्यो नगमूर्धनि ॥ ४ ॥

ततो राक्षसराजेन क्रुद्धेन नृपतिस्तदा ।
तलेनाभिहतो मूर्ध्नि स रथान्निपपात ह ॥ ५ ॥

तं प्रहस्याब्रवीद्रक्षोऽनरण्यं पृथिवीपतिम् ।
किं त्वयाप्तं फलं ब्रूहि युध्यमानेन मां प्रति ॥ ६ ॥

तस्यैवं ब्रुवतो राजा मन्दासुर्वाक्यमब्रवीत्
किं त्विदानीं मया शक्यं कर्तुं प्राणपरीक्षये ॥ ७ ॥

यदि दत्तं यदि हुतं यदि मे सुकृतं तपः ।
यदि गुप्ताः प्रजाः सम्यक् तदा सत्यं वचोऽस्तु मे ॥ ८

उत्पत्स्यते कुले ह्यस्मिन्निक्ष्वाकूणां महात्मनाम् ।
रामो दाशरथिर्नाम यस्ते प्राणान्हरिष्यति ॥ ९ ॥ (18)

(*b*) 1 Illustrate the use of **प्रति** as governing an Accusative and an Ablative.

2 State and illustrate the use of the Potential participles **पेय** and **स्थेय**, so as to bring out their peculiarities of Syntax (5)

II. (1) Decline (*a*) सेदिवस्, feminine of अनडुह्, भवत् m., and जगत् in the Nominative plural.

(*b*) उभय, त्रिंशत्, रघु, and वर्षभोग्य in the genitive plural.

(*c*) नप्तृ, महात्मन् *f.*, चमू, and एक in the Accusative singular and plural. (8)

(2) Give (*a*) the second person sing. Imperative of लिह्, दिश्, लू, and व्रश्च्.

(*b*) the third person sing., simple Future and Perfect, of हन्, तन्, यज्, and ह्वे.

(*c*) the past participle of वद्, रञ्ज्, ली, and क्षै.

(*d*) the third person sing. of the Imperfect of प्र + क्रम्, सं + गम्, and शद्. (9)

III. Translate into English:—

(*a*) मनुजेन हि जगत्यत्र बलवदाक्रमः सोढव्यः, प्रणयभङ्गदुःखं वेदितव्यम्, शासनविलम्बः क्षन्तव्यः, राजपुरुषाविनयस्तितिक्षणीयः, गुणवतापि सता

गुणद्रोहिणोऽधिक्षेपगिरोऽवशं मर्षणीयाः, दुःसहा अपि भारा वोढव्याः, श्रमविकलं च सविलापं च निरानन्दं च जीवितव्यम् । एवमादीनि दुरन्तान्याघातावमानादीनि कृच्छ्राणि जनकृतानि नरमुपातिष्ठन्ति ।

इत्थं जीवितं कामं कष्टसंकुलम् । मरणमप्यगणितस्वप्नभयमपि न दुःखा-सङ्गरहितम् । नरोणासुविमोक्षादूर्ध्वं लेशतोऽप्यज्ञातं स्थानं गन्तव्यम् । यत्र गतस्य न पुनरावृत्तिरपि श्रूयते । तत्र चाविज्ञातस्वरूपाण्यैहिकेभ्योऽपि दारुणतराणि व्य-सनानि कदाचित्तमभिभवेयुः । इमामनागनवर्ती चिन्तां वहन्मनुज आत्मघातान्नि-वृत्य वर्तमानेष्वेव परिचितलघुषु क्लेशेष्वनुषज्यते ।

एवं विमृशनो जन्तोश्चेतसि भीरुता पदं करोति । इयं च विमर्शोत्थिता भीरुता मानवं निरुत्साहं संपाद्य व्यवसायविमुखं विदधाति । येन तीव्रपौरुषापे-क्षाण्यानि गुरूणि साहसानि नराणां चेतसि जातान्येव विलयमुपयान्ति । (21)

(*b*) **Render into Sanskrit the sentence:—**

1. " The sun's rays deprive the moon of its beauty " by using मुष् both in the active and in the passive, so as to prove its द्विकर्मकत्व.

2. Distinguish between स्थूलाक्षा and स्थूलाक्षी.

3. Parse the words in the following:—समुद्रात् पर्वतः क्रोशौ. (7)

IV. (*a*) Render freely into Sanskrit one of the following sentences:—

1 I am sorry, because, as a supplicant, I come to you too late.

2 Such of the roving senses as the mind yields to, hurries away the understanding, as the gale hurries away a ship upon the waters. (4)

(*b*) **Translate into English:—**

१ न निर्मिता केन न दृष्टपूर्वा
न श्रूयते हेममयी कुरङ्गी ।
तथापि तृष्णा रघुनन्दनस्य
विनाशकाले विपरीतबुद्धिः ॥१॥

२ नात्मानमवमन्येत पूर्वाभिरसमृद्धिभिः
आ मृत्योः श्रियमन्विच्छेन्नैनां मन्येत दुर्लभाम् ॥ १ ॥ (5)

(*c*) Dissolve and name the following compounds:—
अष्टाध्यायी, पश्चिमोत्तरा, अनुदिनम्, त्रिफल, and नव-कम्बलः. (4)

V. Translate into Sanskrit:—

A certain blind man who had no property but an earthen pot and a tattered blanket once went to a temple and in sheer despair resolved to end his weary life by abstaining from food altogether and devoting himself to prayers all the while. There the Deity being pleased showed himself before him and offered to grant him a boon. The blind man shrewdly inquired who he was, and, on being told that he was the great God, continued "But how can I believe it unless I see you with my own eyes?" The Deity in a moment restored his sight. He then knelt down and prayed that he should live to see his grandson in the enjoyment of kingly powers. Thus he wisely secured by his one wish sight, long-life, and prosperity. (19)

Group XXXIV.

I. (*a*) Translate into English:—

केषुचिच्चतुष्पदेषु वर्तमानं तत्पेशलमवघ्राणसामर्थ्यं तां च गमनावस्थानादिभिर्मानवेङ्गितापोहने शक्तिं प्रत्यक्षीकुर्वतो नरस्य सुमहान्विस्मयो जायते । इदं सामर्थ्यमेषा च शक्तिर्मनुजजीवितमपि रक्षितुं क्षमेते, इति भूयोऽनुभवसिद्धम् । निकामं यतमानैर्मानवैर्येलद्वयस्यास्योपार्जनमपि दुष्करं, कुतोऽन्यत्र वितरणम् ? केचित्तिर्यग्गोचरा गुणविशेषा मनुजेऽपि विरलतरं संभवन्ति । येषामधिगमाय निरहंकारेण मनसा मनुजन्मना प्रयतितव्यम् ।

भवतु नाम भर्ता प्रसादसुमुखः करुणाविमुखो वा । स कामं गृहस्थितो विप्रोषितो वास्तु । दृढादरो मन्दादरो वा जायताम् । तस्मिन् भर्तेत्येव तिरश्चा

सकृद्रूढः स्नेहः, ततो विश्लेषयितुं भाग्यविपर्ययेणापि वा श्लथयितुं न सुकरः। इयं बलीयसी भक्तिः, न तर्जनेन विक्रियां ग्राहयितुं न चोत्कोचनेन विपर्यासं यापयितुं शक्या। क्षुद्रानुग्रहाणामपि कृते, अहो निरतिशया कृतवेदिता पशुभिः प्रकटीक्रियते, या न केवलं यावदायुस्तिष्ठति, किं च चेतनापगमेऽपि दृशोः स्फुटं प्रतीयमाना प्राणैरपि सार्धं नोत्क्रामतीव। (20)

(*b*) Form compounds of the following:—

पुरुषस्य + आयुः, घट + उधस् (बहुव्रीहि), ध्वजस्य + छाया, जनानां + पदं (meaning a country), and शोक + ऋत. (8)

II. (1) Give (*a*) the Ablative singular and plural of पति, श्री, त्रि, and सम्यच्.

(*b*) Nominative singular and Vocative plural of अनडुह्, पुंस्, दधत् *m.* and *n.*, and अहन्. (9)

(2) Give (*a*) the second person, singular and plural, of the present of आ + शास्, हु, हन् and ध्मा.

(*b*) the third person singular of the Perfect of स्निह्, सद्, पण् (to praise) and राज्.

(*c*) the past participles of चक्ष्, सह्, मुह्, वा, and स्था.

(*d*) the present participles of आस्, विद्, घस्, and या. (9)

III. Translate into Sanskrit:—

Maruti found Sita sitting under a tree in the Ashoka grove, pale, emaciated and mournful. Judging her to be the great queen of Râma, he slowly appeared before her and with a view to convince her that he was not an enemy threw Râma's ring before her. Overpowered with joy at the sudden sight of the ring, Sita gazed at Mâruti for a long time, while tears of joy flowed down her cheeks copiously. He then told her how and why he had come there and comforted her with the assurance that Râma would soon come with a mighty army to rescue her.

IV. (*a*) Translate into English:— (14)

शङ्कुकर्णः—(उपसृत्य) जयतु महाराजः ! अविदितागमनेन केनापि द्वारेण ससंरम्भमभिमर्दिताशोकवनिका।

रावणः—(सावज्ञम्) कथं, वानरेण ? गच्छ, शीघ्रं निगृह्यानय ।

युधि जगत्त्रयभीतिकृतोऽपि मे यदि कृतं त्रिदशैरिदमप्रियम् ।
अनुभवन्त्वचिरादमृताशिनः फलमतो निजशाठ्यसमुद्भवम् ॥ १ ॥

शङ्कुकर्णः—(निष्क्रम्य पुनः प्रविश्य) जयतु महाराजः । महाबलः खलु स वानरः । तेन खलु मृणालवदुत्पाटिताः सालवृक्षाः, मुष्टिना भग्नो दारुपर्वतकः । पाणितलाभ्यामभिमृदितानि लतागृहाणि, नादेनैव विसंज्ञीकृताः प्रमदवनपालाः । किं च—

अस्मदीयैर्महावृक्षैरस्मदीया महाबलाः ।
क्षिप्रमेव हतास्तेन किंकराः शस्त्रयोधिनः ॥ १ ॥

रावणः—कथं हता इति ? तेन हि कुमारमक्षमाज्ञापय वानरग्रहणाय ।

कुमारो हि कृतास्त्रश्च शूरश्च बलवानपि ।
प्रसह्य वापि गृह्णीयाद्धन्याद्वा तं वनौकसम् ॥ ३ ॥ (25)

(*b*) Render freely into Sanskrit:—

1 If the very flowers can suffice to cut off life by simply touching the body, what else will not prove a weapon in the hands of fate bent on striking ?

2 Your business is with the action only, never with its fruits; so let not the fruit of action be your motive, nor be you attached to inactivity.

3 Better is silence observed than a lie told.

4 A stitch in time saves nine. (13)

V. (*a*) Translate into English:—

(१) इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम् ।
रजो विश्रमयन्राज्ञां छत्रशून्येषु मौलिषु ॥ १ ॥

(२) जवो हि सप्तेः परमं विभूषणं
त्रपाङ्गनायाः कृशता तपस्विनः ।
द्विजस्य विद्या नृपतेरपि क्षमा
पराक्रमः शस्त्रबलोपजीविनाम् ॥ २ ॥

(३) वसन्त्यरण्येषु चरन्ति दूर्वां
पिबन्ति तोयान्यपरिग्रहाणि ।
तथापि वध्या हरिणा नराणां
को लोकमाराधयितुं समर्थः ॥ १ ॥ (9)

(*b*) (1) Re-write the following, changing the cases of the words underlined:—

स शिरोभिः महीं तस्तार

(2) Distinguish between the senses of **अर्थी** and **अर्थवान्**.

(3) Parse all the words of the following sentence:—

धात्रा मरुत् सर्पाणामशनं कल्पितः ।

(4) Replace the words underlined in the following by **वने** accompanied by an adjectival compound:—

ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने (3)

Group XXXV

I. (*a*) अस्ति कावेरीतीरे स्वस्थदृढविग्रहः कोऽपि कृषीवलो वसतिमकार्षीत् । आ प्रभातात्, आ च दिनान्तात्, क्षेत्रे श्राम्यन्नपि सोऽविरतं विहगकुलभाल्लास-सुभगमगासीत् । इदं च प्रतिपदमपाठीत्, यथा—

नाहं द्रुह्यामि कस्मैचित्कोऽपि मां नाभ्यसूयति ।

एतद्धेलागीतमाकर्ण्य प्रवयसा हलवर्मणा नाम नृपतिना सोऽभाषि । अहो ते प्रमादः ! नूनं त्वमनृतवादी, यतोऽविदितचिन्तामयमनोहरां तवेमां वृत्तिं पश्यतो महतीर्ष्या मे संजायते । मदीयां दत्त्वा त्वदीयां वृत्तिमादातुं बलवती मे स्पृहा, यदि केवलमेवं कृतवतोऽपि मे चेतश्चिन्ताविरहसमुत्थां लघुतामासाद्य प्रसादं समधिगच्छेत् । कावेरीप्लावितस्य समृद्धिशालिनो भूभागस्येश्वरस्यापि सतश्चिन्तापरीतचेतसो मम महदिदमाश्चर्यं यत्त्वमित्थमुच्चैः स्वैरं गायसि । एतस्मिन्कर्षकः प्राञ्जलिर्भूत्वा सहर्षमवादीत् । प्रतिदिनमायासोपार्जितो ममाहारः । अहं गृहिण्यां स्थिरानुरागः, सुहृदि सस्नेहः, अपत्येषु वत्सलश्च । कार्यवशाज्जायमानमपि ममर्णं

सुखशोष्यमेव । सर्वथा नमस्या मे भगवती कावेरी या क्षेत्रसेकेन सस्यानि संपाद्य सकुटुम्बं मां बिभर्ति । एकदाकर्ण्य हलवर्मा सनिःश्वासमब्रवीत् । सौम्य, आपृच्छे त्वाम् । सर्वथा सुखी भूयाः । मा पुनर्मंस्था यन्न कोऽप्यविकलं सुखं भुञ्जाने त्वयि मत्सरकलुषः इति । धूलिधूसरमपि तवेदमुष्णीषं राजकिरीटादपि महत्तरमभिमतं मे, हलाद्युपकरणजातं च राजसंपदोऽपि । धन्या खलु सा भूमिर्या त्वमपेतकैतवाभिरामं व्यवहरन्नधितिष्ठसि । (22)

(*b*) Illustrate the uses, in the Active and Passive, of the causals of कृ and वह्. (4)

(*c*) Distinguish between the senses of the ब० compounds सुगन्धः and सुगन्धिः.

II. (1) Give (*a*) the third person, singular, Present, of सिच्, व्ये, सिव्, and द्विष्.

(*b*) The third person, singular and plural, of the Perfect of त्रप्, श्रम्, फल् and कृत्.

(*c*) The past participles of अश्, कुष् with निर्, प्रच्छ् and सिव्.

(*d*) The perfect participles of विद्, क्षम्, पा, and सद्. (9)

(2) Decline (*a*) गृह, दंपति, सुपथिन् (a good path), and द्वितीया in the Genitive sing. and plural.

(*b*) धुर्, रुज्, सुधी (learned), and द्विगु *n.* in the Ablative sing. and dual. (8)

III. (*a*) Translate into English:—

एष पर्वतसंकाशो हनूमान्मारुतात्मजः ।
तितीर्षति महावेगः समुद्रं वरुणालयम् ॥ १ ॥
रामार्थं वानरार्थं च चिकीर्षन्कर्म दुष्करम् ।
समुद्रस्य परं पारं दुष्प्रापं प्राप्तुमिच्छति ॥ २ ॥
इति शृण्वन्वचस्तेषां मुनीनां शैलवासिनाम् ।
दुधुवे च स रोमाणि प्रकम्पे चानिलोपमः ।
ननाद च महानादं सुमहानिव तोयदः ॥ ३ ॥
वानरान्वानरश्रेष्ठ इदं वचनमब्रवीत् ।

यथा राघवनिर्मुक्तः शरः श्वसनविक्रमः ।
गच्छेत्तद्वद्गमिष्यामि लङ्कां रावणपालिताम् ॥ ४ ॥
उत्पपाताथ वेगेन वेगवानविचारयन् ।
सुपर्णमिव चात्मानं मेने स कपिकुञ्जरः ॥ ५ ॥
समुत्पतति वेगात्तु वेगात्ते नगरोहिणः ।
संहृत्य विटपान्सर्वान्समुत्पेतुः समन्ततः ॥ ६ ॥
ऊरुवेगोत्थिता वृक्षा मुहूर्तं कपिमन्वयुः ।
प्रस्थितं दीर्घमध्वानं स्वबन्धुमिव बान्धवाः ॥ ७ ॥
सारवन्तोऽथ ये वृक्षा न्यमज्जँल्लवणाम्भसि ।
भयादिव महेन्द्रस्य पर्वता वरुणालये ॥ ८ ॥
स नानाकुसुमैः कीर्णः कपिः साङ्कुरकोरकैः ।
शुशुभे मेघसंकाशः खद्योतैरिव पर्वतः ॥ ९ ॥
विमुक्तास्तस्य वेगेन मुक्त्वा पुष्पाणि ते द्रुमाः ।
व्यवशीर्यन्त सलिले निवृत्ताः सुहृदो यथा ॥ १० ॥ (22)

(b) Give the epithet of इन्द्र that is suggested by the second half of the 8th stanza. (1)

(c) Parse the words in the following:—

विचारमूढः प्रतिभासि मे त्वम्. (2)

IV. (a) Translate into Sanskrit:—

The princess thus addressed the young sage :—

" I lived but on water and the roots and fruits of the wood. Under the guise of telling my beads, I counted my lord's virtues. Thrice a day I bathed in the lake. I daily worshipped Shiva, and in this cell I have dwelt with my old companion, tasting the bitterness of long grief. Only by empty tears I could show gratitude to my lord. By many a penance, I wasted my hated body. Such am I, evil, shameless, cruel, cold, helpless, joyless. Why should one so noble as you deign to look on or speak with me, the doer of this monstrous crime, the slaughter of a Brahmin ? " With these words she covered

her face with the white edge of her bark garment, and unable to quell the irresistible torrent of her tears, she gave way to her sobs and wept loud and long. (20)

(*b*) Translate into English :--

(१) भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥ १ ॥

(२) न विभाव्यन्ते लघवो वित्तविहीनाः पुरोऽपि निवसन्तः ।
सततं जातविनष्टाः पयसामिव बुद्बुदाः पयसि ॥ २ ॥ (5)

(*b*) Dissolve and name the compounds from the above two stanzas. (4)

Group XXXVI.

I. (*a*) Translate into English:—

मानवार्थमेव पशवो विधात्रा निर्मिताः इति नीतिनिपुणाः प्राहुः । मानवा हि बुद्धिबलात्, ईश्वरानुग्रहस्याकलमक्षमत्वाच्च, पशुभ्यो विशिष्टाः । पशवश्च स्वहितनिरपेक्षं यावज्जीवं मानवमेव विविधं सेवन्ते, आयुषोऽन्ते म्रियन्ते च । अतः सेवमानानाममीषां भरणादिकर्म विधात्रैव सेव्येषु निहितम् । एवं सति, तेषु निर्घृणा वृत्तिः स्वामिनं दण्डार्हं न विदध्यात्किम् । यथा पशवो मनुजोपकारेणार्थिनः, तथा मनुजाः, गुणगरीयांसोऽपि सन्तः, स्वार्थसिद्धये पशुसाहाय्यापेक्षिणः ।

पशवो बलाधिका जवशालिनः पटुतरावधानाश्च । तत्कर्तृकं साहाय्यं मनुजानामनल्पाय कल्याणाय । एते हि बलहीना मान्द्योपहताः प्रमादशीलाश्च । कतिपयानां पशूनां स्वार्थनिर्वहणे तादृशमर्थग्रहणनैपुणं शिक्षोपचयक्षमं च पटुत्वमालोक्यते, यन्मानुषमपि कौशलं मुहुरधरीकुर्यात् । (17)

(*b*) Give Sanskrit compounds, one for each of the following: Deserving of respect, soiled by blood, offering no resistance, insufficient, and confusion of castes. (3)

(*c*) Distinguish between the senses of आ-ह्वे in different पद्s, with illustrations. (3)

II. (1) Give (*a*) the Nominative sing. and plural of **तुरासाह्**, **उपानह्**, **स्वसृ**, and **दधत्** *n*.

(*b*) the Dative singular and plural of **स्त्री**, **पुनर्भू** (widow remarried), **क्रोष्टु**, and **अहन्**. (8)

(2) Give (*a*) The second person, singular and plural, of the Present of **श्रु**, **क्षुभ्** *cl*. 9, **भञ्ज्**, and **भी**.

(*b*) Third person singular, passive, of the Present, and Perfect of **हि**, **बन्ध्**, **तॄ**, and **त्रै**.

(*c*) The past participles of **चम्**, **आस्**, **सिच्**, and **शो**.

(*d*) The potential participles ending in **य** of **भुज्**, **तॄ**, **श्रु**, and **खन्**. (9)

III. (*a*) Translate into English :—

हनूमान् (रावणं प्रति)—

राजा दशरथो नाम रथकुञ्जरवाजिमान् ।
पितेव बन्धुर्लोकस्य सुरेश्वरसमद्युतिः ॥ १ ॥

तन्निदेशात्सुतो ज्येष्ठः प्रविष्टो दण्डकावनम् ।
रामो नाम महातेजाः सानुजः सह भार्यया ।
तस्य भार्या जनस्थाने भ्रष्टा वैदेहनन्दिनी ॥ २ ॥

मार्गन्नरण्ये तां देवीं राजपुत्रः सलक्ष्मणः ।
ऋष्यमूकमनुप्राप्तः सुग्रीवेण च संगतः ॥ ३ ॥

तस्य तेन प्रतिज्ञातं सीतायाः परिमार्गणम् ।
सुग्रीवस्यापि रामेण हरिराज्यं प्रतिश्रुतम् ॥ ४ ॥

त्वया विज्ञातपूर्वश्च वाली वानरपुंगवः ।
स तेन निहतः संख्ये शरेणैकेन वानरः ॥ ५ ॥

स सीतामार्गणे व्यग्रः सुग्रीवः सत्यसंगरः ।
हरीन्संप्रेषयामास दिशः सर्वा हरीश्वरः ॥ ६ ॥

वैनतेयसमाः केचित्केचित्तत्रानिलोपमाः ।
असङ्गगतयः शीघ्रा हरिवीरा महाबलाः ॥ ७ ॥ (17)

(*b*) Dissolve and name the following compounds :—

सुग्रीवः, विज्ञातपूर्वः, वानरपुंगवः, व्यग्रः, असङ्गगतयः, and सत्यसंगरः. (6)

(c) 1 Re-write the third stanza above by changing the voice of अनुप्राप्तः; and संगतः.

2 Parse the words of the line हरीन्......हरीश्वरः. (5)

IV. (a) Re-write the following stanza by disjoining the members of compounds and using them separately :—

आयान्त्यः स्वफलभरेण भङ्गुरत्वं
भृङ्गालीनिचयाचिता लतास्तरूणाम् ।
सामोदाः क्षितितलसंस्थितावलोप्या
भोक्तृणां श्रममुदयं न नीतवत्यः ॥ ॥ (3)

(b) Translate into English the above stanza. (4)

V. Translate into Sanskrit:—

One day a prince visited the chief prison in the country over which he ruled. He ordered the prisoners to be brought before him and asked them, one by one, how they came to be in prison.

The first said that he had done no wrong; but that the chief witness against him had given false evidence. The second said that the judge had put him in prison, because he owed him a grudge. The third said that he had been found guilty through mistake. The fourth said that he had been taken for some other man. For these reasons they all begged the prince to release them.

The prince then turned to the fifth prisoner and said "And why are you here ?"

" Alas !" He replied "I stole a purse and dare not ask your pardon." Then the prince said " You are not fit company for such honest men as these, who say they have done no wrong." Turning to the jailor, he said, " Take off this man's chains, and send him away. He has not added to his crime the sin of telling a lie."

" A fault once denied is twice committed." (25)

Group XXXVII.

I. (*a*) Translate into English:--

भीमः--अये: कथमार्यः सुयोधनशङ्कया निर्दयं मामालिङ्गति !

कञ्चुकी--(युधिष्ठिरमुपगम्य सहर्षम्) महाराज, वर्ध्यसे। अयं खल्वा-
युष्मान्भीमसेनः सुयोधनक्षतजारुणितसकलशरीराम्बरो दुर्लक्ष्यव्यक्तिः।
अलमधुना संदेहेन।

युधिष्ठिरः--अपि नैष सुयोधनहतकः ? सत्यमेव पवनात्मजः ?

भीमः--देव, अजातशत्रो ! कुतोऽद्यापि सुयोधनहतकः ? मया निहतस्य
दुरात्मनस्तस्य--

भूमौ क्षिप्तं शरीरं निहितमिदमसृक्चन्दनं भीमगात्रे
लक्ष्मीरार्ये निषण्णा चतुरुदधिपयःसीमया सार्धमुर्व्या।
भृत्या मित्राणि योधाः कुरुकुलमखिलं दग्धमेतद्रणाग्नौ
नामैकं यद्ब्रवीषि क्षितिप तदधुना धार्तराष्ट्रस्य शेषम् ॥ १ ॥

युधिष्ठिरः--(भीमं मुक्त्वा अश्रूणि प्रमृज्य) अपि सत्यं जीवति मे वत्सः
किरीटिना समम् ?

भीमः--निहतसकलरिपुपक्षे त्वयि नराधिपे जीवति भीमोऽर्जुनश्च। (21)

(*b*) Dissolve and name the compounds occurring in the stanza in (*a*). (6)

II. (1) Decline (*a*) त्रि *m*, अल्प *m*, भूरुह्, and वार् in the Nominative and Instrumental plural.

(*b*) हुतभुज्, सम्राज्, समित्, and सेनानी in the Locative sing. and plural. (7)

(2) Give (*a*) The third person, all numbers, of the Present of तृ, ग्रन्थ्, अस्, and क्षुद्.

(*b*) The third person, singular, passive, of the Perfect of काश्, भी, क्री and गम्.

(*c*) The past participles of शास्, छो, व्यथ् and धृष्.

(*d*) The potential participles ending in य of हन्, त्यज्, शास्, and स्तु. (10)

III. (*a*) Translate into English:—

कदाचिदुदधिकूले शुक्तिहस्तेनैकाकिनैव विहरता मया पुलिनतले दिगाब्द-सहितं मन्नामधेयमालिखितम् । ततः प्रसर्पन्नहं परावृत्य भूयोऽपि तमेवोद्देशं सोत्सुकं चक्षुः प्राहिणवम् । तदा तीव्ररंहसोच्चैरुत्सर्पता तरङ्गेण मम लिखितं समीकृत्य विलोपितम् । एतत्पश्यतो मे मनसि समुदभूत् । मदीयानि तानि तानि कर्माण्यपि इत्थमेव नाशं गमिष्यन्ति । यत्र मया जातम्, बाल्यादि च नीतम्, यतश्च मयान्तकालेऽपुनरावृत्तयेऽपक्रमितव्यम्, तत्र पृथिव्यामपि सर्वंकषः कालवेगश्चरितं न विस्मृतिपथं प्रापयिष्यति येन । मच्चरितपिशुनं किमपि नावशिष्टं स्यात् । एवं सत्यपि, यावदायुर्मया यशस्यमयशस्यं वा मनोवाक्कायैः कृतं सर्वमपि कर्मजातं तस्य विश्वेशितुः संनिधौ चिराय लिखितं तिष्ठेत् यस्य सागरगतान्सिकताकणान्गणयितुं नैपुणं, जलानि वा स्तम्भयितुं कौशलं वर्तते । (19)

(*b*) Render freely into Sanskrit:—

1 He enjoyed pleasures without being attached to them.

2 Though they strike at me, I do not wish to kill them; even for the sake of the kingship of the three worlds, how then for earth ?

3 We readily believe what we wish to be true. (8)

IV. (*a*) How do you derive the three words यूनी, युवति and युवती expressive of a young woman ?

(*b*) Take a complex sentence with a clause of time, and compress it into a simple sentence.

(*c*) Parse the following words :—

आश्चर्यो गवां दोहोऽगोपस्य. (8)

V. (*a*) Translate into Sanskrit:—

While शिशुपाल was speaking thus, the exalted slayer of मधु thought in his mind of the discus that humbles the pride of असुरs. And as soon as the discus came into his hands, the illustrious one skilled in speech loudly uttered these words:

" Listen, ye, lords of earth, why this one has been hitherto pardoned by me. Asked by his mother, a hundred offences of his were to be pardoned by me. Even this was the boon she had asked, and even this I granted her. That number, ye kings, has become full. I shall now slay him in your presence, ye monarchs. " Having said this, the chief of the यदुs, that slayer of all foes, in anger instantly cut off the head of the ruler of चेदि, by means of his discus. And the mighty-armed one fell down, like a cliff struck with thunder. (19)

Group XXXVIII.

I. (1) Give (*a*) The Locative sing. and plural of दधि, सेनानी, नृ, and उदच्.

(*b*) The Vocative sing. and Instrumental plural of उशनस्, नामन्, क्रोष्टु, and विश्ववाह्. (6)

(2) Give (*a*) The third person, singular and plural, Present, of पृ, नु, म्ना and पण्.

(*b*) The third person, singular, of the Perfect of वप्, वन्, घृ (6th Conj.), सिध् (4th Conj.).

(*c*) The past participles of धाव्, स्निह्, व्ये, त्रै, and सृज्.

(*d*) The present participles of शास्, इ with अधि, ह्वे, and हन्. (10)

II. (*a*) Translate into English:—

अलमेतेन क्लीबजाल्पितेन यज्जीविनमिदं स्वप्नसंकाशम्, आत्मा च मृत उदासीनत्वात्, दृश्यमानमपि जगत्परमार्थतोऽसत्स्वरूपमिति । अवधार्यतां—सत्यं सत्यमिदं जीवितम्, न च निधनावसायीति । जडस्त्वमासीः, भूयश्च भवितासि, इति वचोऽनात्मविषयमेव । न खलु कामाय न वा शोकाय मनुजस्य जन्मचरितं वा । इह मनुजेन तथा वर्तितव्यं यथानुदिनं मोक्षपदवी लेशतोऽपि नेदीयसी स्यात् । शास्त्रं प्रभूतं, कालश्चापरावर्ती । चलधैर्यावष्टब्धमपि जीवितमिदम् आमपात्रादुदकमिव, निभृतं क्षीयते । जीवितकलहाकुले जननिवेशायमाने विशालेऽस्मिञ्जगति मा-

पारुषविमुखो भूत्वा पशुरिव परविधेयतां व्रज । मधुरायामप्यायतौ मा प्रत्ययं कुरु । अतीतमपि, अतीतमित्येव दूरतस्त्यज । धीरतामास्थाय, ईश्वरे च भरं निधाय, वर्तमान एव सर्वथा सर्वात्मना व्यवहर । इयमेव सच्चरितत: प्रतीतिर्जायते यदस्मा-भिरपि तथा विक्रमोर्जितं जीवितुं शक्यम्, यथास्माकं चरितं परेषामुपमानत गत्वा मुहुर्मुहुर्भङ्गमासेदुषां नैराश्यजुषां ग्लायतां नराणामुत्साहमुत्पाद्य पुनर्नवतां विदध्यात् । तच्छीघ्रमुत्तिष्ठ, अगणितभङ्गः स्थैर्येण पराक्रमस्व, अनुस्मर च भगवतो योगेश्वरस्य पार्थं प्रति वचनम्—यथा—

' कर्मण्येवाधिकारस्ते मा फलेषु कदाचन. '

(*b*) Translate freely into Sanskrit:—

1 Being severely wounded in the heart by that weapon, he fell down on the ground, drawing tears from the eyes of his warriors.

2 The less you have of such friends, the better will it be for you.

3 Joys shared with friends are more enjoyed.

4 He is my friend that helps me and not he that pities me.

III. (*a*) Parse the words in the following:—

तत: प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम्

(*b*) In what senses are the pairs यावत्–तावत् and कामं–तु used ? Give their illustrations.

(*c*) Expand into a complex sentence:—

उपस्थितेयं कल्याणी तस्या नामनि कीर्तिते. (9)

IV. (*a*) Translate into English:—

कामधेनुं वसिष्ठोऽपि यदा तत्याज नो मुनिः ।
तदा तां शबलां नाम विश्वामित्रोऽन्वकर्षत ॥ १ ॥

नीयमाना तु शबला तेन राज्ञा महात्मना ।
दुःखिता चिन्तयामास रुदती शोककर्षिता ॥ २ ॥

परित्यक्ता वसिष्ठेन किमहं सुमहात्मना ।
याहं राजभृतैर्दीना ह्रियेऽत्र भृशदुःखिता ॥ ३ ॥

किं मयापकृतं तस्य महर्षेर्भावितात्मनः ।
यन्मामनागसं दीनां भक्तां त्यजति धार्मिकः ॥ ४ ॥
इति संचिन्त्य सा धेनुर्निःश्वस्य च पुनः पुनः ।
जगाम वेगेन तदा वसिष्ठं परमौजसम् ॥ ५ ॥
निर्धूय तांस्तदा भृत्यान्शतशः शत्रुसूदन ।
जगामानिलवेगेन पादमूलं महात्मनः ।
शबला सा च रुदती क्रोशन्ती वाक्यमब्रवीत् ॥ ६ ॥
भगवन् किं परित्यक्ता त्वयाहं ब्रह्मणः सुत ।
यस्माद्राजभटा मां हि नयन्ते त्वत्सकाशतः ॥ ७ ॥
एवमुक्तस्तु ब्रह्मर्षिरिदं वचमनब्रवीत् ।
शोकसंतप्तहृदयां स्वसारमिव दुःखिताम् ॥ ८ ॥
न त्वां त्यजामि शबले नाऽपि मेऽपकृतं त्वया ।
एष त्वां नयते राजा बलान्मत्तो महाबलः ॥ ९ ॥ (18)

(*b*) Re-write the part 'निपानमिव मण्डूकाः' from the next question, using यथा for इव and making the necessary changes. (2)

V. (*a*) Translate into English:—

Fie upon those who wish to afflict others without any advantage to themselves ! Do you know what such men are called ? Bhartrihari says:—"We do not know who they are that spoil others' interest with no gain to themselves." They are like dogs in the manger that would not eat grass themselves, nor allow the cows to eat the same. These human wretches are worse than brutes and deserve to be shunned. They, indeed, are noble whose earnest desire is to do good to others and resemble trees, that give shade to weary travellers and bear the heat of the sun on their own heads. (15

(*b*) Translate into English:— (16)

१ निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः ।
सोद्योगं नरमायान्ति विवशाः सर्वसंपदः ॥ १ ॥

२ सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रताम्
धृतः शरीरेण मृतः स जीवति ॥ १ ॥

३ बन्धनानि किल सन्ति बहूनि
प्रेमरज्जुकृतबन्धनमन्यत् ।
दारुभेदनिपुणोऽपि षडाङ्घ्रिः
पङ्कजे भवति निष्क्रिय एव ॥ २ ॥ (7)

(*c*) Dissolve and name the compounds contained in the last stanza above. (5)

Group XXXIX

I. Translate into English:—

